# Siva Upanishad

# શ્રીશિવોપનિષત્

## Document Information

Text title : shivopanishhad

File name : shivopanishad.itx

Category : upanishhat, shiva

Location : doc_upanishhat

Author : Traditional

Transliterated by : Converted by Ulrich Stiehl

Latest update : September 7, 2002, October 6, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 24, 2023

*sanskritdocuments.org*

# શ્રીશિવોપનિષત્

કૈલાસશિખરાસીનમશેષામરપૂજિતમ્ ।
કાલઘ્નં શ્રીમહાકાલમીશ્વરં જ્ઞાનપારગમ્ ॥ ૧-૧॥

સમ્પૂજ્ય વિધિવદ્ભક્ત્યા ઋષ્યાત્રેયઃ સુસંયતઃ ।
સર્વભૂતહિતાર્થાય પપ્રચ્છેદં મહામુનિઃ ॥ ૧-૨॥

જ્ઞાનયોગં ન વિન્દન્તિ યે નરા મન્દબુદ્ધયઃ ।
તે મુચ્યન્તે કથં ઘોરાદ્ભગવન્ભવસાગરાત્ ॥ ૧-૩॥

એવં પૃષ્ટઃ પ્રસન્નાત્મા ઋષ્યાત્રેયેણ ધીમતા ।
મન્દબુદ્ધિવિમુક્ત્યર્થં મહાકાલઃ પ્રભાષતે ॥ ૧-૪॥

મહાદેવ ઉવાચ
પુરા રુદ્રેણ ગદિતાઃ શિવધર્માઃ સનાતનાઃ ।
દેવ્યાઃ સર્વગણાનાં ચ સંક્ષેપાદ્ગ્રન્થકોટિભિઃ ॥ ૧-૫॥

આયુઃ પ્રજ્ઞાં તથા શક્તિં પ્રસમીક્ષ્ય નૃણામિહ ।
તાપત્રયપ્રપીડાં ચ ભોગતૃષ્ણાવિમોહિનીમ્ ॥ ૧-૬॥

તે ધર્માઃ સ્કન્દનન્દિભ્યામન્યૈશ્ચ મુનિસત્તમૈઃ ।
સારમાદાય નિર્દિષ્ટાઃ સમ્યક્પ્રકરણાન્તરૈઃ ॥ ૧-૭॥

સારાદપિ મહાસારં શિવોપનિષદં પરમ્ ।
અલ્પગ્રન્થં મહાર્થં ચ પ્રવક્ષ્યામિ જગદ્ધિતમ્ ॥ ૧-૮॥

શિવઃ શિવ ઇમે શાન્ત- નામ ચાદ્યં મુહુર્મુહુઃ ।
ઉચ્ચારયન્તિ તદ્ભક્ત્યા તે શિવા નાત્ર સંશયઃ ॥ ૧-૯॥

અશિવાઃ પાશસંયુક્તાઃ પશવઃ સર્વચેતનાઃ ।
યસ્માદ્વિલક્ષણાસ્તેભ્યસ્તસ્માદીશઃ શિવઃ સ્મૃતઃ ॥ ૧-૧૦॥

ગુણો બુદ્ધિરહંકારસ્તન્માત્રાણીન્દ્રિયાનિ ચ ।

ભૂતાનિ ચ ચતુર્વિંશદિતિ પાશાઃ પ્રકીર્તિતાઃ ॥ ૧-૧૧॥

પઞ્ચવિંશકમજ્ઞાનં સહજં સર્વદેહિનામ્ ।
પાશાજાલસ્ય તન્મૂલં પ્રકૃતિઃ કારણાય નઃ ॥ ૧-૧૨॥

સત્યજ્ઞાને નિબધ્યન્તે પુરુષાઃ પાશબન્ધનૈઃ ।
મદ્ભાવાચ્ચ વિમુચ્યન્તે જ્ઞાનિનઃ પાશપઞ્જરાત્ ॥ ૧-૧૩॥

ષડ્વિંશકશ્ચ પુરુષઃ પશુરજ્ઞઃ શિવાગમે ।
સપ્તવિંશ ઇતિ પ્રોક્તઃ શિવઃ સર્વજગત્પતિઃ ॥ ૧-૧૪॥

યસ્માચ્છિવઃ સુસમ્પૂર્ણઃ સર્વજ્ઞઃ સર્વગઃ પ્રભુઃ ।
તસ્માત્સ પાશહરિતઃ સ વિશુદ્ધઃ સ્વભાવતઃ ॥ ૧-૧૫॥

પશુપાશપરઃ શાન્તઃ પરમજ્ઞાનદેશિકઃ ।
શિવઃ શિવાય ભૂતાનાં તં વિજ્ઞાય વિમુચ્યતે ॥ ૧-૧૬॥

એતદેવ પરં જ્ઞાનં શિવ ઇત્યક્ષરદ્વયમ્ ।
વિચારાદ્યાતિ વિસ્તારં તૈલબિન્દુરિવામ્ભસિ ॥ ૧-૧૭॥

સકૃદુચ્ચારિતં યેન શિવ ઇત્યક્ષરદ્વયમ્ ।
બદ્ધઃ પરિકરસ્તેન મોક્ષોપગમનં પ્રતિ ॥ ૧-૧૮॥

દ્વ્યક્ષરઃ શિવમન્ત્રો ઽયં શિવોપનિષદિ સ્મૃતઃ ।
એકાક્ષરઃ પુનશ્ચાયમોમિત્યેવં વ્યવસ્થિતઃ ॥ ૧-૧૯॥

નામસંકીર્તણાદેવ શિવસ્યાશેષપાતકૈઃ ।
યતઃ પ્રમુચ્યતે ક્ષિપ્રં મન્ત્રો ઽયં દ્વ્યક્ષરઃ પરઃ ॥ ૧-૨૦॥

યઃ શિવં શિવમિત્યેવં દ્વ્યક્ષરં મન્ત્રમભ્યસેત્ ।
એકાક્ષરં વા સતતં સ યાતિ પરમં પદમ્ ॥ ૧-૨૧॥

મિત્રસ્વજનબન્ધૂનાં કુર્યાન્નામ શિવાત્મકમ્ ।
અપિ તત્કીર્તનાદ્યાતિ પાપમુક્તઃ શિવં પુરમ્ ॥ ૧-૨૨॥

વિજ્ઞેયઃ સ શિવઃ શાન્તો નરસ્તદ્ભાવભાવિતઃ ।
આસ્તે સદા નિરુદ્વિગ્નઃ સ દેહાન્તે વિમુચ્યતે ॥ ૧-૨૩॥

હૃદ્યન્તઃકરણં જ્ઞેયં શિવસ્ય આયતનં પરમ્ ।
હૃત્પદ્મં વેદિકા તત્ર લિઙ્ગમોંકારમિષ્યતે ॥ ૧-૨૪॥

પુરુષઃ સ્થાપકો જ્ઞેયઃ સત્યં સંમાર્જનં સ્મૃતમ્ ।
અહિંસા ગોમયં પ્રોક્તં શાન્તિશ્ચ સલિલં પરમ્ ॥ ૧-૨૫ ॥

કુર્યાત્સંમાર્જનં પ્રાજ્ઞો વૈરાગ્યં ચન્દનં સ્મૃતમ્ ।
પૂજયેદ્ધ્યાનયોગેન સંતોષૈઃ કુસુમૈઃ સિતૈઃ ॥ ૧-૨૬ ॥

ધૂપશ્ચ ગુગ્ગુલુર્દેયઃ પ્રાણાયામસમુદ્ભવઃ ।
પ્રત્યાહારશ્ચ નૈવેદ્યમસ્તેયં ચ પ્રદક્ષિણમ્ ॥ ૧-૨૭ ॥

ઇતિ દિવ્યોપચારૈશ્ચ સમ્પૂજ્ય પરમં શિવમ્ ।
જપેદ્ધ્યાયેચ્ચ મુક્ત્યર્થં સર્વસઙ્ગવિવર્જિતઃ ॥ ૧-૨૮ ॥

જ્ઞાનયોગવિનિર્મુક્તઃ કર્મયોગસમાવૃત્તઃ ।
મૃતઃ શિવપુરં ગચ્છેત્સ તેન શિવકર્મણા ॥ ૧-૨૯ ॥

તત્ર ભુક્ત્વા મહાભોગાન્પ્રલયે સર્વદેહિનામ્ ।
શિવધર્માચ્છિવજ્ઞાનં પ્રાપ્ય મુક્તિમવાપ્નુયાત્ ॥ ૧-૩૦ ॥

જ્ઞાનયોગેન મુચ્યન્તે દેહપાતાદનન્તરમ્ ।
ભોગાન્ભુક્ત્વા ચ મુચ્યન્તે પ્રલયે કર્મયોગિનઃ ॥ ૧-૩૧ ॥

તસ્માજ્જ્ઞાનવિદો યોગાત્તથાજ્ઞાઃ કર્મયોગિનઃ ।
સર્વ એવ વિમુચ્યન્તે યે નરાઃ શિવમાશ્રિતાઃ ॥ ૧-૩૨ ॥

સ ભોગઃ શિવવિદ્યાર્થં યેષાં કર્માસ્તિ નિર્મલમ્ ।
તે ભોગાન્પ્રાપ્ય મુચ્યન્તે પ્રલયે શિવવિદ્યયા ॥ ૧-૩૩ ॥

વિદ્યા સંકીર્તનીયા હિ યેષાં કર્મ ન વિદ્યતે ।
તે ચાવર્ત્ય વિમુચ્યન્તે યાવત્કર્મ ન તદ્ભવેત્ ॥ ૧-૩૪ ॥

શિવજ્ઞાનવિદં તસ્માત્પૂજયેદ્વિભવૈર્ગુરુમ્ ।
વિદ્યાદાનં ચ કુર્વીત ભોગમોક્ષજિગીષયા ॥ ૧-૩૫ ॥

શિવયોગી શિવજ્ઞાની શિવજાપી તપોઽધિકઃ ।
ક્રમશઃ કર્મયોગી ચ પઞ્ચૈતે મુક્તિભાજનાઃ ॥ ૧-૩૬ ॥

કર્મયોગસ્ય યન્મૂલં તદ્વક્ષ્યામિ સમાસતઃ ।
લિઙ્ગમાયતનં ચેતિ તત્ર કર્મ પ્રવર્તતે ॥ ૧-૩૭ ॥

॥ ઇતિ શિવોપનિષદિ મુક્તિનિર્દેશાધ્યાયઃ પ્રથમઃ ॥

અથ પૂર્વસ્થિતો લિઙ્ગે ગર્ભઃ સ ત્રિગુણો ભવેત્ ।
ગર્ભાદ્વાપિ વિભાગેન સ્થાપ્ય લિઙ્ગં શિવાલયે ॥ ૨-૧॥

યાવલ્લિઙ્ગસ્ય દૈર્ઘ્યં સ્યાત્તાવદ્વેદ્યાશ્ચ વિસ્તરઃ ।
લિઙ્ગતૃતીયભાગેન ભવેદ્વેદ્યાઃ સમુચ્છ્રયઃ ॥ ૨-૨॥

ભાગમેકં ન્યસેદ્ભૂમૌ દ્વિતીયં વેદિમધ્યતઃ ।
તૃતીયભાગે પૂજા સ્વાદિતિ લિઙ્ગં ત્રિધા સ્થિતમ્ ॥ ૨-૩॥

ભૂમિસ્થં ચતુરશ્રં સ્વાદષ્ટાશ્રં વેદિમધ્યતઃ ।
પૂજાર્થં વર્તુલં કાર્યં દૈર્ઘ્યાત્રિગુણવિસ્તરમ્ ॥ ૨-૪॥

અધોભાગે સ્થિતઃ સ્કન્દઃ સ્થિતા દેવી ચ મધ્યતઃ ।
ઊર્ધ્વં રુદ્રઃ ક્રમાદ્વાપિ બ્રહ્મવિષ્ણુમહેશ્વરાઃ ॥ ૨-૫॥

એત એવ ત્રયો લોકા એત એવ ત્રયો ગુણાઃ ।
એત એવ ત્રયો વેદા એતચ્ચાન્યત્સ્થિતં ત્રિધા ॥ ૨-૬॥

નવહસ્તઃ સ્મૃતો જ્યેષ્ઠઃ ષડ્ઢસ્તશ્ચાપિ મધ્યમઃ ।
વિદ્યાત્કનીયસ્ત્રૈહસ્તં લિઙ્ગમાનમિદં સ્મૃતમ્ ॥ ૨-૭॥

ગર્ભસ્યાનતઃ પ્રવિસ્તારસ્તદૂનશ્ચ ન શસ્યતે ।
ગર્ભસ્યાનતઃ પ્રવિસ્તારાદ્તદુપર્યપિ સંસ્થિતમ્ ॥ ૨-૮॥

પ્રાસાદં કલ્પયેચ્છ્રીમાન્વિભજેત ત્રિધા પુનઃ ।
ભાગ એકો ભવેજ્જઙ્ઘા દ્વૌ ભાગૌ મઞ્જરી સ્મૃતા ॥ ૨-૯॥

મઞ્જર્યા અર્ધભાગસ્થં શુકનાસં પ્રકલ્પયેત્ ।
ગર્ભાદર્ધેન વિસ્તારમાયામં ચ સુશોભનમ્ ॥ ૨-૧૦॥

ગર્ભાદ્વાપિ ત્રિભાગેન શુકનાસં પ્રકલ્પયેત્ ।
ગર્ભાદર્ધેન વિસ્તીર્ણા ગર્ભાચ્ચ દ્વિગુણાયતા ॥ ૨-૧૧॥

જઙ્ઘાભિશ્ચ ભવેત્કાર્યા મઞ્જર્યઙ્ગુલરાશિના ।
પ્રાસાદાર્ધેન વિજ્ઞેયો મણ્ડપસ્તસ્ય વામતઃ ॥ ૨-૧૨॥

મણ્ડપાત્પાદવિસ્તીર્ણા જગતી તાવદુચ્છ્રિતા ।
પ્રાસાદસ્ય પ્રમાણેન જગત્યા સાર્ધમઙ્ગણમ્ ॥ ૨-૧૩॥

પ્રાકારં તત્સમન્તાચ્ચ ગુપુરાદાલભૂષિતમ્ ।

પ્રાકારાન્તઃ સ્થિતં કાર્યં વૃષસ્થાનં સમુચ્છ્રિતમ્ ॥ ૨-૧૪॥

નન્દીશ્વરમહાકાલૌ દ્વારશાખાવ્યવસ્થિતૌ ।
પ્રાકારાદ્દક્ષિણે કાર્યં સર્વોપકરણાન્વિતમ્ ॥ ૨-૧૫॥

પઞ્ચભૌમં ત્રિભૌમં વા યોગીન્દ્રાવસથં મહત્ ।
પ્રાકારગુપ્તં તત્કાર્યં મૈત્રસ્થાનસમન્વિતમ્ ॥ ૨-૧૬॥

સ્થાનાદ્દ્શસમાયુક્તં ભવ્યવૃક્ષજલાન્વિતમ્ ।
તન્મહાનસમાગ્નેય્યાં પૂર્વતઃ સત્રમણ્ડપમ્ ॥ ૨-૧૭॥

સ્થાનં ચણ્ડેશમૈશાન્યાં પુષ્પારામં તથોત્તરમ્ ।
કોષ્ઠાગારં ચ વાયવ્યાં વારુણ્યાં વરુણાલયમ્ ॥ ૨-૧૮॥

શમીન્ધનકુશસ્થાનમાયુધાનાં ચ નૈરૃતમ્ ।
સર્વલોકોપકારાય નગરસ્થં પ્રકલ્પયેત્ ॥ ૨-૧૯॥

શ્રીમદાયતનં શમ્ભોર્યોગિનાં વિજને વને ।
શિવસ્યાયતને યાવત્સમેતાઃ પરમાણવઃ ॥ ૨-૨૦॥

મન્વન્તરાણિ તાવન્તિ કર્તુર્ભોગાઃ શિવે પુરે ।
મહાપ્રતિમલિઙ્ગાનિ મહાન્ત્યાયતનાનિ ચ ॥ ૨-૨૧॥

કૃત્વાપ્નોતિ મહાભોગાનન્તે મુક્તિં ચ શાશ્વતીમ્ ।
લિઙ્ગપ્રતિષ્ઠાં કુર્વીત યદા તલ્લક્ષણં કૃતી ॥ ૨-૨૨॥

પઞ્ચગવ્યેન સંશોધ્ય પૂજયિત્વાધિવાસયેત્ ।
પાલાશોદુમ્બરાશ્વત્થ- પૃષદાજ્યતિલૈર્યવૈઃ ॥ ૨-૨૩॥

અગ્નિકાર્યં પ્રકુર્વીત દદ્યાત્પૂર્ણાહુતિત્રયમ્ ।
શિવસ્યાષ્ટશતં હુત્વા લિઙ્ગમૂલં સ્પૃશેદ્બુધઃ ॥ ૨-૨૪॥

એવં મધ્યે ઽવસાને તન્મૂર્તિમન્ત્રૈશ્ચ મૂર્તિષુ ।
અષ્ટૌ મૂર્તીશ્વરાઃ કાર્યાઃ નવમઃ સ્થાપકઃ સ્મૃતઃ ॥ ૨-૨૫॥

પ્રાતઃ સંસ્થાપયેલ્લિઙ્ગં મન્ત્રૈસ્તુ નવભિઃ ક્રમાત્ ।
મહાસ્નાપનપૂજાં ચ સ્થાપ્ય લિઙ્ગં પ્રપૂજયેત્ ॥ ૨-૨૬॥

ગુરોર્મૂર્તિધરાણાં ચ દદ્યાદુત્તમદક્ષિણામ્ ।
યતીનાં ચ સમસ્તાનાં દદ્યાન્મધ્યમદક્ષિણામ્ ॥ ૨-૨૭॥

દીનાન્ધકૃપણેભ્યશ્ચ સર્વાસામુપકલ્પયેત્ ।
સર્વભક્ષ્યાન્નપાનાદ્યૈરનિષિદ્ધં ચ ભોજનમ્ ॥ ૨-૨૮॥

કલ્પયેદાગતાનાં ચ ભૂતેભ્યશ્ચ બલિં હરેત્ ।
રાત્રૌ માતૃગણાનાં ચ બલિં દદ્યાદ્વિશેષતઃ ॥ ૨-૨૯॥

એવં યઃ સ્થાપયેલ્લિઙ્ગં તસ્ય પુણ્યફલં શ઼ૃણુ ।
કુલત્રિંશકમુદ્ધૃત્ય ભૃત્યૈશ્ચ પરિવારિતઃ ॥ ૨-૩૦॥

કલત્રપુત્રમિત્રાદ્યૈઃ સહિતઃ સર્વબાન્ધવૈઃ ।
વિમુચ્ય પાપકલિલં શિવલોકં વ્રજેન્નરઃ ।
તત્ર ભુક્ત્વા મહાભોગાન્પ્રલયે મુક્તિમાપ્નુયાત્ ॥ ૨-૩૧॥

॥ ઇતિ શિવોપનિષદિ લિઙ્ગાયતનાધ્યાયો દ્વિતીયઃ ॥

---

અથાન્યૈરલ્પવિત્તૈશ્ચ નૃપૈશ્ચ શિવભાવિતૈઃ ।
શક્તિતઃ સ્વાશ્રમે કાર્યં શિવશાન્તિગૃહદ્વયમ્ ॥ ૩-૧॥

ગૃહસ્યેશાનદિગ્ભાગે કાર્યમુત્તરતો ઽપિ વા ।
ખાત્વા ભૂમિં સમુદ્ધૃત્ય શલ્યાનાકોટ્ય યત્નતઃ ॥ ૩-૨॥

શિવદેવગૃહં કાર્યમષ્ટહસ્તપ્રમાણતઃ ।
દક્ષિણોત્તરદિગ્ભાગે કિંચિદ્દીર્ઘં પ્રકલ્પયેત્ ॥ ૩-૩॥

હસ્તમાત્રપ્રમાણં ચ દૃઢપટ્ટચતુષ્ટયમ્ ।
ચતુષ્કોણેષુ સંયોજ્યમર્ઘ્યપાત્રાદિસંશ્રયમ્ ॥ ૩-૪॥

ગર્ભમધ્યે પ્રકુર્વીત શિવવેદિં સુશોભનામ્ ।
ઉદગર્વાક્ચ્છ્રિતાં(?) કિંચિચ્ચતુઃશીર્ષકસંયુતામ્ ॥ ૩-૫॥

ત્રિહસ્તાયામવિસ્તારામ્ષોડશાઙ્ગુલમુચ્છ્રિતામ્ ।
તચ્છીર્ષાણીવ હસ્તાર્ધમાયામાદ્વિસ્તરેણ ચ ॥ ૩-૬॥

શિવસ્થણ્ડિલમિત્યેતચ્ચતુર્હસ્તં સમં શિરઃ ।
મૂર્તિનૈવેદ્યદીપાનાં વિન્યાસાર્થં પ્રકલ્પયેત્ ॥ ૩-૭॥

શૈવલિઙ્ગેન કાર્યં સ્યાત્કાર્યં મણિજપાર્થિવૈઃ ।
સ્થણ્ડિલાર્ધે ચ કુર્વન્તિ વેદિમન્યાં સવર્તુલામ્ ॥ ૩-૮॥

ષોડશાઙ્ગુલમુત્સેધાં વિસ્તીર્ણાં દ્વિગુણેન ચ ।

ગૃહે ન સ્થાપયેચ્છૈલં લિઙ્ગં મણિજમર્ચયેત્ ॥ ૩-૯॥

ત્રિસંધ્યં પાર્થિવં વાપિ કુર્યાદન્ચદ્દિનેદિને ।
સર્વેષામેવ વર્ણાનાં સ્ફાટિકં સર્વકામદમ્ ॥ ૩-૧૦॥

સર્વદોષવિનિર્મુક્તમન્યથા દોષમાવહેત્ ।
આયુષ્માન્બલવાઞ્શ્રીમાન્પુત્રવાન્ધનવાન્સુખી ॥ ૩-૧૧॥

વરમિષ્ટં ચ લભતે લિઙ્ગં પાર્થિવમર્ચયન્ ।
તસ્માદ્ધિ પાર્થિવં લિઙ્ગં જ્ઞેયં સર્વાર્થસાધકમ્ ॥ ૩-૧૨॥

નિર્દોષં સુલભં ચૈવ પૂજયેત્સતતં બુધઃ ।
યથા યથા મહાલિઙ્ગં પૂજા શ્રદ્ધા યથા યથા ॥ ૩-૧૩॥

તથા તથા મહત્પુણ્યં વિજ્ઞેયમનુરૂપતઃ ।
પ્રતિમાલિઙ્ગવેદીષુ યાવન્તઃ પરમાણવઃ ।
તાવત્કલ્પાન્મહાભોગસ્તત્કર્તાસ્તે શિવે પુરે ॥ ૩-૧૪॥

॥ ઇતિ શિવોપનિષદિ શિવગૃહાધ્યાયસ્તૃતીયઃ ॥

---

અથૈકભિન્નાવિચ્છિન્નં પુરતઃ શાન્તિમણ્ડપમ્ ।
પૂર્વાપરાષ્ટહસ્તં સ્યાદ્દ્વાદશોત્તરદક્ષિણે ॥ ૪-૧॥

તદ્દ્વારભિત્તિસંબદ્ધં કપિચ્છુકસમાવૃતમ્ ।
પટદ્વયં ભવેત્સ્થાપ્ય સ્રુવાદ્યાવારહેતુના ॥ ૪-૨॥

દ્વારં ત્રિશાખં વિજ્ઞેયં નવત્યઙ્ગુલમુચ્છ્રિતમ્ ।
તદર્ધેન ચ વિસ્તીર્ણં સત્કવાટં શિવાલયે ॥ ૪-૩॥

દીર્ઘં પઞ્ચનવત્યા ચ પઞ્ચશાખાસુશોભિતમ્ ।
સત્કવાટદ્વયોપેતં શ્રીમદ્વાહનમણ્ટપમ્ ॥ ૪-૪॥

દ્વારં પશ્ચાન્મુખં જ્ઞેયમશેષાર્થપ્રસાધકમ્ ।
અભાવે પ્રાઙ્મુખં કાર્યમુદગ્દક્ષિણતો ન ચ ॥ ૪-૫॥

ગવાક્ષકદ્વયં કાર્યમપિધાનં સુશોભનમ્ ।
ધૂમનિર્ગમનાર્થાય દક્ષિણોત્તરકુડ્યયોઃ ॥ ૪-૬॥

આગ્નેયભાગાત્પરિતઃ કાર્યા જાલગવાક્ષકાઃ ।
ઊર્ધ્વસ્તૂપિકયા યુક્તા ઈષચ્છિદ્રપિધાનયા ॥ ૪-૭॥

શિવાગ્નિહોત્રકુણ્ડં ચ વૃત્તં હસ્તપ્રમાણતઃ ।
ચતુરશ્રવેદિ(kA) શ્રીમન્મેખલાત્રયભૂષિતમ્ ॥ ૪-૮॥

કુડ્યં દ્વિહસ્તવિસ્તીર્ણં પઞ્ચહસ્તસમુચ્છ્રિતમ્ ।
શિવાગ્નિહોત્રશરણં કર્તવ્યમતિશોભનમ્ ॥ ૪-૯॥

જગતીસ્તમ્ભપટ્ટાદ્યં સપ્તસંખ્યં ચ કલ્પયેત્ ।
બન્ધયોગવિનિર્મુક્તં તુલ્યસ્થાનપદાન્તરમ્ ॥ ૪-૧૦॥

ઐષ્ટકં કલ્પયેદ્યત્નાચ્છિવાગ્ન્યાયતનં મહત્ ।
ચતુઃપ્રેગીવકોપેતમ્(?) એકપ્રેગીવકેન વા(?) ॥ ૪-૧૧॥

સુધાપ્રલિપ્તં કર્તવ્યં પઞ્ચાણ્ડકબિભૂષિતમ્ ।
શિવાગ્નિહોત્રશરણં ચતુરણ્ડકસંયુતમ્ ॥ ૪-૧૨॥

બહિસ્તદેવ જગતી ત્રિહસ્તા વા સુકુટ્ટિમા ।
તાવદેવ ચ વિસ્તીર્ણા મેખલાદિવિભૂષિતા ॥ ૪-૧૩॥

કર્તવ્યા ચાત્ર જગતી તસ્યાશ્ચાધઃ સમન્તતઃ ।
દ્વિહસ્તમાત્રવિસ્તીર્ણા તદર્ધાર્ધસમુચ્છ્રિતા ॥ ૪-૧૪॥

અન્યા વૃત્તા પ્રકર્તવ્યા રુદ્રવેદી સુશોભના ।
દશહસ્તપ્રમાણા ચ ચતુરઙ્ગુલમુચ્છ્રિતા ॥ ૪-૧૫॥

રુદ્રમાતૃગણાનાં ચ દિક્પતીનાં ચ સર્વદા ।
સર્વાગ્રપાકસંયુક્તં તાસુ નિત્યબલિં હરેત્ ॥ ૪-૧૬॥

વેદ્યન્યા સર્વભૂતાનાં બહિઃ કાર્યા દ્વિહસ્તિકા ।
વૃષસ્થાનં ચ કર્તવ્યં શિવાલોકનસંમુખમ્ ॥ ૪-૧૭॥

અગ્ન્યાર્ષસવિતુર્વ્યોમ વૃષઃ કાર્યશ્ચ પશ્ચિમે ।
વ્યોમ્નશ્ચાધસ્ત્રિગર્ભં સ્યાત્પિતૃતર્પણવેદિકા ॥ ૪-૧૮॥

પ્રાકારાન્તર્બહિઃ કાર્યં શ્રીમદ્ગોપુરભૂષિતમ્ ।
પુષ્પારામજલોપેતં પ્રાકારાન્તં ચ કારયેત્ ॥ ૪-૧૯॥

મૃદ્દારુજં તૃણચ્છન્નં પ્રકુર્વીત શિવાલયમ્ ।
ભૂમિકાદ્વયવિન્યાસાદુત્ક્ષિપ્તં કલ્પયેદ્બુધઃ ॥ ૪-૨૦॥

શિવદક્ષિણતઃ કાર્યં તદ્ભુક્તેર્યોગ્યમાલયમ્ ।

શય્યાસનસમાયુક્તં વાસ્તુવિદ્યાવિનિર્મિતમ્ ॥ ૪-૨૧॥

ધ્વજસિંહૌ વૃષગજૌ ચત્વારઃ શોભનાઃ સ્મૃતાઃ ।
ધૂમશ્વગર્દભધ્વાઙ્ક્ષાશ્ચત્વારશ્ચાર્થનાશકાઃ ॥ ૪-૨૨॥

ગૃહસ્યાયામવિસ્તારં કૃત્વા ત્રિગુણમાદિતઃ ।
અષ્ટભિઃ શોધયેદાપૈઃ શેષશ્ચ ગૃહમાદિશેત્ ॥ ૪-૨૩॥

ઇતિ શાન્તિગૃહં કૃત્વા રુદ્રાગ્નિં યઃ પ્રવર્તયેત્ ।
અપ્યેકં દિવસં ભક્ત્યા તસ્ય પુણ્યફલં શ‍ૃણુ ॥ ૪-૨૪॥

કલત્રપુત્રમિત્રાદ્યૈઃ સ ભૃત્યૈઃ પરિવારિતઃ ।
કુલૈકવિંશદુત્તાર્ય દેવલોકમવાપ્નુયાત્ ॥ ૪-૨૫॥

નીલોત્પલદલશ્યામાઃ પીનવૃત્તપયોધરાઃ ।
હેમવર્ણાઃ સ્ત્રિયશ્ચાન્યાઃ સુન્દર્યઃ પ્રિયદર્શનાઃ ॥ ૪-૨૬॥

તાભિઃ સાર્ધં મહાભોગૈર્વિમાનૈઃ સાર્વકામિકૈઃ ।
ઇચ્છયા ક્રીડતે તાવદ્યાવદાભૂતસમ્પ્લવમ્ ॥ ૪-૨૭॥

તતઃ કલ્પાગ્નિના સાર્ધં દહ્યમાનં સુવિહ્વલમ્ ।
દૃષ્ટ્વા વિરજ્યતે ભૂયો ભવભોગમહાર્ણવાત્ ॥ ૪-૨૮॥

તતઃ સમ્પૃચ્છતે રુદ્રાંસ્તત્રસ્થાઞ્જ્ઞાનપારગાન્ ।
તેભ્યઃ પ્રાપ્ય શિવજ્ઞાનં શાન્તં નિર્વાણમાપ્નુયાત્ ॥ ૪-૨૯॥

અવિરક્તશ્ચ ભોગેભ્યઃ સપ્ત જન્માનિ જાયતે ।
પૃથિવ્યધિપતિઃ શ્રીમાનિચ્છયા વા દ્વિજોત્તમઃ ॥ ૪-૩૦॥

સપ્તમાજ્જન્મનશ્ચાન્તે શિવજ્ઞાનમનાપ્નુયાત્ ।
જ્ઞાનાદ્વિરક્તઃ સંસારાચ્છુદ્ધઃ ખાન્યધિતિષ્ઠતિ ॥ ૪-૩૧॥

ઇત્યેતદખિલં કાર્યં ફલમુક્તં સમાસતઃ ।
ઉત્સવે ચ પુનર્ભૂમઃ પ્રત્યેકં દ્રવ્યજં ફલમ્ ॥ ૪-૩૨॥

સદ્ગન્ધગુટિકામેકાં લાક્ષાં પ્રાણ્યઙ્ગવર્જિતામ્ ।
કર્પાસાસ્થિપ્રમાણં ચ હુત્વાગ્નૌ શ‍ૃણુયાત્ફલમ્ ॥ ૪-૩૩॥

યાવત્સત્ગન્ધગુટિકા શિવાગ્નૌ સંખ્યયા હુતા ।
તાવત્કોટ્યસ્તુ વર્ષાણિ ભોગાન્ભુઙ્ક્તે શિવે પુરે ॥ ૪-૩૪॥

એકાઙ્ગુલપ્રમાણેન હુત્વાગ્નૌ ચન્દનાહુતિમ્ ।
વર્ષકોટિદ્વયં ભોગૈર્દિવ્યૈઃ શિવપુરે વસેત્ ॥ ૪-૩૫॥

યાવત્કેસરસંખ્યાનં કુસુમસ્યાનલે હુતમ્ ।
તાવદ્યુગસહસ્રાણિ શિવલોકે મહીયતે ॥ ૪-૩૬॥

નાગકેસરપુષ્પં તુ કુઙ્કુમાર્ધેન કીર્તિતમ્ ।
યત્ફલં ચન્દનસ્યોક્તમુશીરસ્ય તદર્ધકમ્ ॥ ૪-૩૭॥

યત્પુષ્પધૂપભક્ષ્યાન્ન- દધિક્ષીરઘૃતાદિભિઃ ।
પુણ્યલિઙ્ગાર્ચને પ્રોક્તં તદ્ધોમસ્ય દશાધિકમ્ ॥ ૪-૩૮॥

હુત્વાગ્નૌ સમિધસ્તિસ્રૌ શિવોમાસ્કન્દનામભિઃ ।
પશ્ચાદ્દ્ધાત્તિલાન્નાનિ હોમયીત યથાક્રમમ્ ॥ ૪-૩૯॥

પલાશાઙ્કુરજારિષ્ટ- પાલાલ્યઃ(?) સમિધઃ શુભાઃ ।
પૃષદાજ્યપ્લુતા હુત્વા શ઼ૃણુ યત્ફલમાપ્નુયાત્ ॥ ૪-૪૦॥

પલાશાઙ્કુરસંખ્યાનાં યાવદગ્નૌ હુતં ભવેત્ ।
તાવત્કલ્પાન્મહાભોગૈઃ શિવલોકે મહીયતે ॥ ૪-૪૧॥

તલ્લક્ષ્યમધ્યસંભૂતં હુત્વાગ્નૌ સમિધઃ શુભાઃ ।
કલ્પાર્ધસંમિતં કાલં ભોગાન્ભુઙ્ક્તે શિવે પુરે ॥ ૪-૪૨॥

શમીસમિત્ફલં દેયમબ્દાનપિ ચ લક્ષકમ્ ।
શમ્યર્ધફલવચ્છેષાઃ સમિધઃ ક્ષીરવૃક્ષજાઃ ॥ ૪-૪૩॥

તિલસંખ્યાંસ્તિલાન્હુત્વા હ્યાજ્યાક્તા(?) યાવતી ભવેત્ ।
તાવત્સ વર્ષલક્ષાંસ્તુ ભોગાન્ભુઙ્ક્તે શિવે પુરે ॥ ૪-૪૪॥

યાવત્સુરૌષધીરન્નાસ્(?) તિલતુલ્યફલં સ્મૃતમ્ ।
ઇતરેભ્યસ્તિલેભ્યશ્ચ કૃષ્ણાનાં દ્વિગુણં ફલમ્ ॥ ૪-૪૫॥

લાજાક્ષતાઃ સગોધૂમાઃ વર્ષલક્ષફલપ્રદાઃ ।
દશસાહસ્રિકા જ્ઞેયાઃ શેષાઃ સ્યુર્બીજજાતયઃ ॥ ૪-૪૬॥

પલાશેન્ધનજે વહ્નૌ હોમસ્ય દ્વિગુણં ફલમ્ ।
ક્ષીરવૃક્ષસમૃદ્ધે ઽગ્નૌ ફલં સાર્ધાધિકં ભવેત્ ॥ ૪-૪૭॥

અસમિદ્ધે સધૂમે ચ હોમકર્મ નિરર્થકમ્ ।
અન્ધશ્ચ જાયમાનઃ સ્યાદ્દારિદ્ર્યોપહતસ્તથા ॥ ૪-૪૮॥

ન ચ કણ્ટકિભિર્વૃક્ષૈરગ્નિં પ્રજ્વાલ્ય હોમયેત્ ।
શુષ્કૈર્નવૈઃ પ્રશસ્તૈશ્ચ કાષ્ઠૈરગ્નિં સમિન્ધયેત્ ॥ ૪-૪૯ ॥

એવમાજ્યાહુતિં હુત્વા શિવલોકમવાપ્નુયાત્ ।
તત્ર કલ્પશતં ભોગાન્ભુઙ્ક્તે દિવ્યાન્યથેપ્સિતાન્ ॥ ૪-૫૦ ॥

સ્રુચૈકાહિતમાત્રેણ વ્રતસ્યાપૂરિતેન ચ ।
યાહુતિર્દીયતે વહ્નૌ સા પૂર્ણાહુતિરુચ્યતે ॥ ૪-૫૧ ॥

એકાં પૂર્ણાહુતિં હુત્વા શિવેન શિવભાવિતઃ ।
સર્વકામમવાપ્નોતિ શિવલોકે વ્યવસ્થિતઃ ॥ ૪-૫૨ ॥

અશેષકુલજૈર્સાર્ધં સ ભૃત્યૈઃ પરિવારિતઃ ।
આભૂતસમ્પ્લવં યાવદ્ભોગાન્ભુઙ્ક્તે યથેપ્સિતાન્ ॥ ૪-૫૩ ॥

તતશ્ચ પ્રલયે પ્રાપ્તે સમ્પ્રાપ્ય જ્ઞાનમુત્તમમ્ ।
પ્રસાદાદીશ્વરસ્યૈવ મુચ્યતે ભવસાગરાત્ ॥ ૪-૫૪ ॥

શિવપૂર્ણાહુતિં વહ્નૌ પતન્તીં યઃ પ્રપશ્યતિ ।
સો ऽપિ પાપરિ નરઃ સર્વૈર્મુક્તઃ શિવપુરં વ્રજેત્ ॥ ૪-૫૫ ॥

શિવાગ્નિધૂમસંસ્પૃષ્ટા જીવાઃ સર્વે ચરાચરાઃ ।
તે ऽપિ પાપવિનિર્મુક્તાઃ સ્વર્ગં યાન્તિ ન સંશયઃ ॥ ૪-૫૬ ॥

શિવયજ્ઞમહાવેદ્યા જાયતે યે ન સન્તિ વા ।
તે ऽપિ યાન્તિ શિવસ્થાનં જીવાઃ સ્થાવરજઙ્ગમાઃ ॥ ૪-૫૭ ॥

પૂર્ણાહુતિં ઘૃતાભાવે ક્ષીરતૈલેન કલ્પયેત્ ।
હોમયેદતસીતૈલં તિલતૈલં વિના નરઃ ॥ ૪-૫૮ ॥

સર્ષપેઙ્ગુડિકાશામ્ર- કરઞ્જમધુકાક્ષજમ્ ।
પ્રિયઙ્ગુબિલ્વપૈપ્પલ્ય- નાલિકેરસમુદ્ભવમ્(?) ॥ ૪-૫૯ ॥

ઇત્યેવમાદિકં તૈલમાજ્યાભાવે પ્રકલ્પયેત્ ।
દૂર્વયા બિલ્વપત્રૈર્વા સમિધઃ સમ્પ્રકીર્તિતાઃ ॥ ૪-૬૦ ॥

અન્નાર્થં હોમયેત્ક્ષીરં દધિ મૂલફલાનિ વા ।
તિલાર્થં તણ્ડુલૈઃ કુર્યાદ્ભાર્થં હરિતૈસ્તૃણૈઃ ॥ ૪-૬૧ ॥

પરિધીનામભાવેન શરૈર્વંશૈશ્ચ કલ્પયેત્ ।

ઇન્ધનાનામભાવેન દીપયેત્તૃણગોમયૈઃ ॥ ૪-૬૨॥

ગોમયાનામભાવેન મહત્યમ્ભસિ હોમયેત્ ।
અપામસંભવે હોમં ભૂમિભાગે મનોહરે ॥ ૪-૬૩॥

વિપ્રસ્ય દક્ષિણે પાણાવશ્વત્થે તદભાવતઃ ।
છાગસ્ય દક્ષિણે કર્ણે કુશમૂલે ચ હોમયેત્ ॥ ૪-૬૪॥

સ્વાત્માગ્નૌ હોમયેત્પ્રાજ્ઞઃ સર્વાગ્નીનામસંભવે ।
અભાવે ન ત્યજેત્કર્મ કર્મયોગવિધૌ સ્થિતઃ ॥ ૪-૬૫॥

આપત્કાલે ઽપિ યઃ કુર્યાચ્છિવાગ્નેર્મનસાર્ચનમ્ ।
સ મોહકઞ્ચુકં ત્યક્ત્વા પરાં શાન્તિમવાપ્નુયાત્ ॥ ૪-૬૬॥

પ્રાણાગ્નિહોત્રં કુર્વન્તિ પરમં શિવયોગિનઃ ।
બાહ્યકર્મવિનિર્મુક્તા જ્ઞાનધ્યાનસમાકુલાઃ ॥ ૪-૬૭॥

॥ ઇતિ શિવોપનિષદિ શાન્તિગૃહાગ્નિકાર્યાધ્યાયશ્ચતુર્થઃ ॥

---

અથાગ્નેયં મહાસ્નાનમલક્ષ્મીમલનાશનમ્ ।
સર્વપાપહરં દિવ્યં તપઃ શ્રીકીર્તિવર્ધનમ્ ॥ ૫-૧॥

અગ્નિરૂપેણ રુદ્રેણ સ્વતેજઃ પરમં બલમ્ ।
ભૂતિરૂપં સમુદ્ગીર્ણં વિશુદ્ધં દુરિતાપહમ્ ॥ ૫-૨॥

યક્ષરક્ષઃપિશાચાનાં ધ્વંસનં મન્ત્રસત્કૃતમ્ ।
રક્ષાર્થં બાલરૂપાણાં સૂતિકાનાં ગૃહેષુ ચ ॥ ૫-૩॥

યશ્ચ ભુઙ્ક્તે દ્વિજઃ કૃત્વા અન્નસ્ય વા પરિધિત્રયમ્(?) ।
અપિ શૂદ્રસ્ય પઙ્ક્તિસ્થઃ પઙ્ક્તિદોષૈર્ન લિપ્યતે ॥ ૫-૪॥

આહારમર્ધભુક્તં ચ કીટકેશાદિદૂષિતમ્ ।
તાવન્માત્રં સમુદ્ધૃત્ય ભૂતિસ્પૃષ્ટં વિશુદ્ધ્યતિ ॥ ૫-૫॥

આરણ્યં ગોમયકૃતં કરીષં વા પ્રશસ્યતે ।
શર્કરાપાંસુનિર્મુક્તમભાવે કાષ્ઠભસ્મના ॥ ૫-૬॥

સ્વગૃહાશ્રમવલ્લિભ્યઃ કુલાલાલયભસ્મના ।
ગોમયેષુ ચ દગ્ધેષુ હીષ્ટકાનિ ચ યેષુ ચ ॥ ૫-૭॥

સર્વત્ર વિદ્યતે ભસ્મ દુઃખાપાર્જનરક્ષણમ્(duHkhopAr) ।
શઙ્ખકુન્દેન્દુવર્ણાભમાદદ્યાજ્જન્તુવર્જિતમ્ ॥ ૫-૮॥

ભસ્માનીય પ્રયત્નેન તદ્રક્ષેદ્યત્નવાંસ્તથા ।
માર્જારમૂષિકાદ્યૈશ્ચ નોપહન્યેત તદ્યથા ॥ ૫-૯॥

પઞ્ચદોષવિનિર્મુક્તં ગુણપઞ્ચકસંયુતમ્ ।
શિવૈકાદશિકાજન્મં શિવભસ્મ પ્રકીર્તિતમ્ ॥ ૫-૧૦॥

જાતિકારુકવાક્કાય- સ્થાનદુષ્ટં ચ પઞ્ચમમ્ ।
પાપઘ્નં શાંકરં રક્ષા- પવિત્રં યોગદં ગુણાઃ(?) ॥ ૫-૧૧॥

શિવવ્રતસ્ય શાન્તસ્ય ભાસકત્વાચ્છુભસ્ય ચ ।
ભક્ષણાત્સર્વપાપાનાં ભસ્મેતિ પરિકીર્તિતમ્ ॥ ૫-૧૨॥

ભસ્મસ્નાનં શિવસ્નાનં વારુણાદધિકં સ્મૃતમ્ ।
જન્તુશૈવાલનિર્મુક્તમાગ્નેયં પઙ્કવર્જિતમ્ ॥ ૫-૧૩॥

અપવિત્રં ભવેત્તોયં નિશિ પૂર્વમનાહૃતમ્ ।
નદીતડાગવાપિષુ ગિરિપ્રસ્રવણેષુ ચ ॥ ૫-૧૪॥

સ્નાનં સાધારણં પ્રોક્તં વારુણં સર્વદેહિનામ્ ।
અસાધારણમેવોક્તં ભસ્મસ્નાનં દ્વિજન્મનામ્ ॥ ૫-૧૫॥

ત્રિકાલં વારુણસ્નાનાદનારોગ્યં પ્રજાયતે ।
આગ્નેયં રોગશમનમેતસ્માદ્સાર્વકામિકમ્ ॥ ૫-૧૬॥

સંધ્યાત્રયે ડર્ધરાત્રે ચ ભુક્ત્વા ચાન્નવિરેચને ।
શિવયોગ્યાચરેત્સ્નાનમુચ્ચારાદિક્રિયાસુ ચ ॥ ૫-૧૭॥

ભસ્માસ્તૃતે મહીભાગે સમે જન્તુવિવર્જિતે ।
ધ્યાયમાનઃ શિવં યોગી રજન્યન્તં શયીત ચ ॥ ૫-૧૮॥

એકરાત્રોષિતસ્યાપિ યા ગતિર્ભસ્મશાયિનઃ ।
ન સા શક્યા ગૃહસ્થેન પ્રાપ્તું યજ્ઞશતૈરપિ ॥ ૫-૧૯॥

ગૃહસ્થસ્ત્ર્યાયુષોંકારૈઃ સ્નાનં કુર્યાત્ત્રિપુણ્ડ્રકૈઃ ।
યતિઃ સાર્વાઙ્ગિકં સ્નાનમાપાદતલમસ્તકાત્ ॥ ૫-૨૦॥

શિવભક્તસ્ત્રિધા વેદ્યાં ભસ્મસ્નાનફલં લભેત્ ।
હૃદિ મૂર્ધ્નિ લલાટે ચ શૂદ્રઃ શિવગૃહાશ્રમી ॥ ૫-૨૧॥

ગણાઃ પ્રવ્રજિતાઃ શાન્તાઃ ભૂતિમાલભ્ય પઞ્ચધા ।
શિરોલલાટે હૃદ્બાહ્વોર્ભસ્મસ્નાનફલં લભેત્ ॥ ૫-૨૨॥

સંવત્સરં તદર્ધં વા ચતુર્દશ્યષ્ટમીષુ ચ ।
યઃ કુર્યાદ્ભસ્મના સ્નાનં તસ્ય પુણ્યફલં શ◌ૃનુ ॥ ૫-૨૩॥

શિવભસ્મનિ યાવન્તઃ સમેતાઃ પરમાણવઃ ।
તાવદ્વર્ષસહસ્રાણિ શિવલોકે મહીયતે ॥ ૫-૨૪॥

એકવિંશકુલોપેતઃ પત્નીપુત્રાદિસંયુતઃ ।
મિત્રસ્વજનભૃત્યૈશ્ચ સમસ્તૈઃ પરિવારિતઃ ॥ ૫-૨૫॥

તત્ર ભુક્ત્વા મહાભોગાનિચ્છયા સાર્વકામિકાન્ ।
જ્ઞાનયોગં સમાસાદ્ય પ્રલયે મુક્તિમાપ્નુયાત્ ॥ ૫-૨૬॥

ભસ્મ ભસ્માન્તિકં યેન ગૃહીતં નૈષ્ઠિકવ્રતમ્(?) ।
અનેન વૈ સ દેહેન રુદ્રશ્ચઙ્ક્રમતે ક્ષિતૌ ॥ ૫-૨૭॥

ભસ્મસ્નાનરતં શાન્તં યે નમન્તિ દિને દિને ।
તે સર્વપાપનિર્મુક્તા નરા યાન્તિ શિવં પુરમ્ ॥ ૫-૨૮॥

ઇત્યેતત્પરમં સ્નાનમાગ્નેયં શિવનિર્મિતમ્ ।
ત્રિસંધ્યમાચરેન્નિત્યં જાપી યોગમવાપ્નુયાત્ ॥ ૫-૨૯॥

ભસ્માનીય પ્રદદ્યાદ્યઃ સ્નાનાર્થં શિવયોગિને ।
કલ્પં શિવપુરે ભોગાન્ભુક્ત્વાન્તે સ્યાદ્દ્વિજોત્તમઃ ॥ ૫-૩૦॥

આગ્નેયં વારુણં માન્ત્રં વાયવ્યં ત્વૈન્દ્રપઞ્ચમમ્ ।
માનસં શાન્તિતોયં ચ જ્ઞાનસ્નાનં તથાષ્ટમમ્ ॥ ૫-૩૧ ॥

આગ્નેયં રુદ્રમન્ત્રેણ ભસ્મસ્નાનમનુત્તમમ્ ।
અમ્ભસા વારુણં સ્નાનમ્કાર્યં વારુણમૂર્તિના ॥ ૫-૩૨॥

મૂર્ધાનં પાણિનાલભ્ય શિવૈકાદશિકાં જપેત્ ।
ધ્યાયમાનઃ શિવં શાન્તમ્મન્ત્રસ્નાનં પરં સ્મૃતમ્ ॥ ૫-૩૩॥

ગવાં ખુરપુટોત્ખાત- પવનોદ્ધૂતરેણુના ।
કાર્યં વાયવ્યકં સ્નાનમ્મન્ત્રેણ મરુદાત્મના ॥ ૫-૩૪॥

વ્યભ્રે ઽર્કે વર્ષતિ સ્નાનં કુર્યાદૈન્દ્રીં દિશં સ્થિતઃ ।

આકાશમૂર્તિમન્ત્રેણ તદૈન્દ્રમિતિ કીર્તિતમ્ ॥ ૫-૩૫॥

ઉદકં પાણિના ગૃહ્ય સર્વતીર્થાનિ સંસ્મરેત્ ।
અભ્યુક્ષયેચ્છિરસ્તેન સ્નાનં માનસમુચ્યતે ॥ ૫-૩૬॥

પૃથિવ્યાં યાનિ તીર્થાનિ સરાંસ્યાયતનાનિ ચ ।
તેષુ સ્નાતસ્ય યત્પુણ્યં તત્પુણ્યં ક્ષાન્તિવારિણા ॥ ૫-૩૭॥

ન તથા શુધ્યતે તીર્થૈસ્તપોભિર્વા મહાધ્વરૈઃ ।
પુરુષઃ સર્વદાનૈશ્ચ યથા ક્ષાન્ત્યા વિશુદ્ધ્યતિ ॥ ૫-૩૮॥

આક્રુષ્ટસ્તાડિતસ્તસ્માદધિક્ષિપ્તસ્તિરસ્કૃત ।
ક્ષમેદક્ષમમાનાનાં સ્વર્ગમોક્ષજિગીષયા ॥ ૫-૩૯॥

યૈવ બ્રહ્મવિદાં પ્રાપ્તિર્યૈવ પ્રાપ્તિસ્તપસ્વિનામ્ ।
યૈવ યોગાભિયુક્તાનાં ગતિઃ સૈવ ક્ષમાવતામ્ ॥ ૫-૪૦॥

જ્ઞાનામલામ્ભસા સ્નાતઃ સર્વદૈવ મુનિઃ શુચિઃ ।
નિર્મલઃ સુવિશુદ્ધશ્ચ વિજ્ઞેયઃ સૂર્યરશ્મિવત્ ॥ ૫-૪૧॥

મેધ્યામેધ્યરસં યદ્વદપિ વત્સ વિના કરૈઃ ।
નૈવ લિપ્યતિ તદ્દોષૈસ્તદ્વજ્જ્ઞાની સુનિર્મલઃ ॥ ૫-૪૨॥

એષામેકતમે સ્નાતઃ શુદ્ધભાવઃ શિવં વ્રજેત્ ।
અશુદ્ધભાવઃ સ્નાતો ઽપિ પૂજયન્નાપ્નુયાત્ફલમ્ ॥ ૫-૪૩॥

જલં મન્ત્રં દયા દાનં સત્યમિન્દ્રિયસંયમઃ ।
જ્ઞાનં ભાવાત્મશુદ્ધિશ્ચ શૌચમષ્ટવિધં શ્રુતમ્ ॥ ૫-૪૪॥

અઙ્ગુષ્ઠતલમૂલે ચ બ્રાહ્મં તીર્થમવસ્થિતમ્ ।
તેનાચમ્ય ભવેચ્છુદ્ધઃ શિવમન્ત્રેણ ભાવિતઃ ॥ ૫-૪૫॥

યદધઃ કન્યકાયાશ્ચ તત્તીર્થં દૈવમુચ્યતે ।
તીર્થં પ્રદેશિનીમૂલે પિત્ર્યં પિતૃવિધોદયમ્(?) ॥ ૫-૪૬॥

મધ્યમાઙ્ગુલિમધ્યેન તીર્થમારિષમુચ્યતે ।
કરપુષ્કરમધ્યે તુ શિવતીર્થં પ્રતિષ્ઠિતમ્ ॥ ૫-૪૭॥

વામપાણિતલે તીર્થમૌમમ્નામ પ્રકીર્તિતમ્ ।
શિવોમાતીર્થસંયોગાત્કુર્યાત્સ્નાનાભિષેચનમ્ ॥ ૫-૪૮॥

દેવાન્દૈવેન તીર્થેન તર્પયેદકૃતામ્ભસા ।
ઉદ્ધૃત્ય દક્ષિણં પાણિમુપવીતી સદા બુધઃ ॥ ૫-૪૯॥

પ્રાચીનાવીતિના કાર્યં પિતૃણાં તિલવારિણા ।
તર્પણં સર્વભૂતાનામારિષેણ નિવીતિના ॥ ૫-૫૦॥

સવ્યસ્કન્ધે યદા સૂત્રમુપવીત્યુચ્યતે તદા ।
પ્રાચીનાવીત્યસવ્યેન નિવીતી કણ્ઠસંસ્થિતે ॥ ૫-૫૧॥

પિતૃણાં તર્પણં કૃત્વા સૂર્યાયાર્ઘ્યં પ્રકલ્પયેત્ ।
ઉપસ્થાય તતઃ સૂર્યં યજેચ્છિવમનન્તરમ્ ॥ ૫-૫૨॥

॥ ઇતિ શિવોપનિષદિ શિવભસ્મસ્નાનાધ્યાયઃ પઞ્ચમઃ ॥

---

અથ ભક્ત્યા શિવં પૂજ્ય નૈવેદ્યમુપકલ્પયેત્ ।
યદન્નમાત્મનાશ્નીયાત્તસ્યાગ્રે વિનિવેદયેત્ ॥ ૬-૧॥

યઃ કૃત્વા ભક્ષ્યભોજ્યાનિ યત્નેન વિનિવેદયેત્ ।
શિવાય સ શિવે લોકે કલ્પકોટિં પ્રમોદતે ॥ ૬-૨॥

યઃ પક્વં શ્રીફલં દદ્યાચ્છિવાય વિનિવેદયેત્ ।
ગુરોર્વા હોમયેદ્વાપિ તસ્ય પુણ્યફલં શ૱ૃણુ ॥ ૬-૩॥

શ્રીમદ્ભિઃ સ મહાયાનૈર્ભોગાન્ભુઙ્ક્તે શિવે પુરે ।
વર્ષાણામયુતં સાગ્રં તદન્તે શ્રીપતિર્ભવેત્ ॥ ૬-૪॥

કપિત્થમેકં યઃ પક્વમીશ્વરાય નિવેદયેત્ ।
વર્ષલક્ષં મહાભોગૈઃ શિવલોકે મહીયતે ॥ ૬-૫॥

એકમામ્રફલં પક્વં યઃ શમ્ભોર્વિનિવેદયેત્ ।
વર્ષાણામ્યુતં ભોગૈઃ ક્રીડતે સ શિવે પુરે ॥ ૬-૬॥

એકં વટફલં પક્વં યઃ શિવાય નિવેદયેત્ ।
વર્ષલક્ષં મહાભોગૈઃ શિવલોકે મહીયતે ॥ ૬-૭॥

યઃ પક્વં દાડિમં ચૈકં દદ્યાદ્વિકસિતં નવમ્ ।
શિવાય ગુરવે વાપિ તસ્ય પુણ્યફલં શ૱ૃણુ ॥ ૬-૮॥

યાવત્તદ્બીજસંખ્યાનં શોભનં પરિકીર્તિતમ્ ।
તાવદષ્ટાયુતાન્યુચ્ચૈઃ શિવલોકે મહીયતે ॥ ૬-૯॥

દ્રાક્ષાફલાનિ પક્વાનિ યઃ શિવાય નિવેદયેત્ ।
ભક્ત્યા વા શિવયોગિભ્યસ્તસ્ય પુણ્યફલં શૃણુ ॥ ૬-૧૦॥

યાવત્તત્ફલસંખ્યાનમુભયોર્વિનિવેદિતમ્ ।
તાવદ્યુગસહસ્રાણિ રુદ્રલોકે મહીયતે ॥ ૬-૧૧॥

દ્રાક્ષાફલેષુ યત્પુણ્યં તત્ખર્જૂરફલેષુ ચ ।
તદેવ રાજવૃક્ષેષુ પારાવતફલેષુ ચ ॥ ૬-૧૨॥

યો નારઙ્ગફલં પક્વં વિનિવેદ્ય મહેશ્વરે ।
અષ્ટલક્ષં મહાભોગૈઃ ક્રુડતે સ શિવે પુરે ॥ ૬-૧૩॥

બીજપૂરેષુ તસ્યાર્ધં તદર્ધં લિકુચેષુ ચ ।
જમ્બૂફલેષુ યત્પુણ્યં તત્પુણ્યં તિન્દુકેષુ ચ ॥ ૬-૧૪॥

પનસં નારિકેલં વા શિવાય વિનિવેદયેત્ ।
વર્ષલક્ષં મહાભોગૈઃ શિવલોકે મહીયતે ॥ ૬-૧૫॥

પુરુષં ચ પ્રિયાલં ચ મધૂકકુસુમાનિ ચ ।
જમ્બૂફલાનિ પક્વાનિ વૈકઙ્કતફલાનિ ચ ॥ ૬-૧૬॥

નિવેદ્ય ભક્ત્યા શર્વાય પ્રત્યેકં તુ ફલે ફલે ।
દશવર્ષસહસ્રાણિ રુદ્રલોકે મહીયતે ॥ ૬-૧૭॥

ક્ષીરિકાયાઃ ફલં પક્વં યઃ શિવાય નિવેદયેત્ ।
વર્ષલક્ષં મહાભોગૈર્મોદતે સ શિવે પુરે ॥ ૬-૧૮॥

વાલુકાત્રપુસાદીનિ યઃ ફલાનિ નિવેદયેત્ ।
શિવાય ગુરવે વાપિ પક્વં ચ કરમર્દકમ્ ॥ ૬-૧૯॥

દશવર્ષસહસ્રાણિ રુદ્રલોકે મહીયતે ।
બદરાણિ સુપક્વાનિ તિન્તિડીકફલાનિ ચ ॥ ૬-૨૦॥

દર્શનીયાનિ પક્વાનિ હ્યામલક્યાઃ ફલાનિ ચ ।
એવમાદીનિ ચાન્યાનિ શાકમૂલફલાનિ ચ ॥ ૬-૨૧॥

નિવેદયતિ શર્વાય શૃણુ યત્ફલમાપ્નુયાત્ ।
એકૈકસ્મિન્ફલે ભોગાન્પ્રાપ્નુયાદનુપૂર્વશઃ ॥ ૬-૨૨॥

પઞ્ચવર્ષસહસ્રાણિ રુદ્રલોકે મહીયતે ।

ગોધૂમચન્દકાદ્યાનિ સુકૃતં સક્તુભર્જિતમ્ ॥ ૬-૨૩॥

નિવેદયીત શર્વાય તસ્ય પુણ્યફલં શ‍ૃણુ ।
યાવત્તદ્બીજસંખ્યાનં શુભં ભ્રષ્ટં નિવેદયેત્ ॥ ૬-૨૪॥

તાવદ્વર્ષસહસ્રાણિ રુદ્રલોકે મહીયતે ।
યઃ પક્વાનીક્ષુદણ્ડાનિ શિવાય વિનિવેદયેત્ ॥ ૬-૨૫॥

ગુરવે વાપિ તદ્ભક્ત્યા તસ્ય પુણ્યફલં શ‍ૃણુ ।
ઇક્ષુપર્ણાનિ ચૈકૈકં વર્ષલોકં પ્રમોદતે ॥ ૬-૨૬॥

સાકં શિવપુરે ભોગૈઃ પૌણ્ડ્રં પઞ્ચગુણં ફલમ્ ।
નિવેદ્ય પરમેશાય શુક્તિમાત્રરસસ્ય તુ ॥ ૬-૨૭॥

વર્ષકોટિં મહાભોગૈઃ શિવલોકે મહીયતે ।
નિવેદ્ય ફાણિતં શુદ્ધં શિવાય ગુરવે ઽપિ વા ॥ ૬-૨૮॥

રસાત્સહસ્રગુણિતં ફલં પ્રાપ્નોતિ માનવઃ ।
ગુડસ્ય ફલમેકં યઃ શિવાય વિનિવેદયેત્ ॥ ૬-૨૯॥

અમ્બકોટિં શિવે લોકે મહાભોગૈઃ પ્રમોદતે ।
ખણ્ડસ્ય પલનૈવેદ્યં ગુડાચ્છતગુણં ફલમ્ ॥ ૬-૩૦॥

ખણ્ડાત્સહસ્રગુણિતં શર્કરાયા નિવેદને ।
મત્સણ્ડિકાં મહાશુદ્ધાં શંકરાય નિવેદયેત્ ॥ ૬-૩૧॥

કલ્પકોટિં નરઃ સાગ્રં શિવલોકે મહીયતે ।
પરિશુદ્ધં ભૃષ્ટમાજ્યં સિદ્ધં ચૈવ સુસંસ્કૃતમ્ ॥ ૬-૩૨॥

માસં નિવેદ્ય શર્વાય શ‍ૃણુ યત્ફલમાપ્નુયાત્ ।
અશેષફલદાનેન યત્પુણ્યં પરિકીર્તિતમ્ ॥ ૬-૩૩॥

તત્પુણ્યં પ્રાપ્નુયાત્સર્વં મહાદાનનિવેદને ।
પનસાનિ ચ દિવ્યાનિ સ્વાદૂનિ સુરભીણિ ચ ॥ ૬-૩૪॥

નિવેદયેત્તુ શર્વાય તસ્ય પુણ્યફલં શ‍ૃણુ ।
કલ્પકોટિં નરઃ સાગ્રં શિવલોકે વ્યવસ્થિતઃ ॥ ૬-૩૫॥

પિબન્શિવામૃતં દિવ્યં મહાભોગૈઃ પ્રમોદતે ।
દિને દિને ચ યસ્ત્વાપં વસ્ત્રપૂતં સમાચરેત્ ॥ ૬-૩૬॥

સુખાય શિવભક્તેભ્યસ્તસ્ય પુણ્યફલં શ઼ૃણુ ।
મહાસરાંસિ યઃ કુર્યાદ્ભવેત્પુણ્યં શિવાગ્રતઃ ॥ ૬-૩૭॥

તત્પુણ્યં સકલં પ્રાપ્ય શિવલોકે મહીયતે ।
યદિષ્ટમાત્મનઃ કિંચિદન્નપાનફલાદિકમ્ ॥ ૬-૩૮॥

તત્તચ્છિવાય દેયં સ્યાદુત્તમં ભોગમિચ્છતા ।
ન શિવઃ પરિપૂર્ણત્વાત્કિંચિદશ્નાતિ કસ્યચિત્ ॥ ૬-૩૯॥

કિન્ત્વીશ્વરનિભં કૃત્વા સર્વમાત્મનિ દીયતે ।
ન રોહતિ યથા બીજં સ્વસ્થમાશ્રયવર્જિતમ્ ॥ ૬-૪૦॥

પુણ્યબીજં તથા સૂક્ષ્મં નિષ્ફલં સ્યાન્નિરાશ્રયમ્ ।
સુક્ષેત્રેષુ યથા બીજમુપ્તં ભવતિ સત્ફલમ્ ॥ ૬-૪૧॥

અલ્પમપ્યક્ષયં તદ્વત્પુણ્યં શિવસમાશ્રયાત્ ।
તસ્માદીશ્વરમુદ્દિશ્ય યદ્યદાત્મનિ રોચતે ॥ ૬-૪૨॥

તત્તદીશ્વરભક્તેભ્યઃ પ્રદાતવ્યં ફલાર્થિના ।
યઃ શિવાય ગુરોર્વાપિ રચયેન્મણિભૂમિકમ્ ॥ ૬-૪૩॥

નૈવેદ્ય ભોજનાર્થં યઃ પત્રૈઃ પુષ્પૈશ્ચ શોભનમ્ ।
યાવત્તત્પત્રપુષ્પાણાં પરિસંખ્યા વિધીયતે ॥ ૬-૪૪॥

તાવદ્વર્ષસહસ્રાણિ સુરલોકે મહીયતે ।
પલાશકદલીપદ્મ- પત્રાણિ ચ વિશેષતઃ ॥ ૬-૪૫॥

દત્ત્વા શિવાય ગુરવે શ઼ૃણુ યત્ફલમાપ્નુયાત્ ।
યાવત્તત્પત્રસંખ્યાનમીશ્વરાય નિવેદિતમ્ ॥ ૬-૪૬॥

તાવદબ્દાયુતાનાં સ લોકે ભોગાનવાપ્નુયાત્ ।
યાવત્તામ્બુલપત્રાણિ પૂગાંશ્ચ વિનિવેદયેત્ ॥ ૬-૪૭॥

તાવન્તિ વર્ષલક્ષાણિ શિવલોકે મહીયતે ।
યચ્છુદ્ધં શઙ્ખચૂર્ણં વા ગુરવે વિનિવેદયેત્ ॥ ૬-૪૮॥

તામ્બૂલયોગસિદ્ધ્યર્થં તસ્ય પુણ્યફલં શ઼ૃણુ ।
યાવત્તામ્બૂલપત્રાણિ ચૂર્ણમાનેન ભક્ષયેત્ ॥ ૬-૪૯॥

તાવદ્વર્ષસહસ્રાણિ રુદ્રલોકે મહીયતે ।
જાતીફલં સકક્કોલં લતાકસ્તૂરિકોત્પલમ્ ॥ ૬-૫૦॥

ઇત્યેતાનિ સુગન્ધીનિ ફલાનિ વિનિવેદયેત્ ।
ફલે ફલે મહાભોગૈર્વર્ષલક્ષં તુ યત્નતઃ ॥ ૬-૫૧॥

કામિકેન વિમાનેન ક્રીડતે સ શિવે પુરે ।
ત્રુટિમાત્રપ્રમાણેન કર્પૂરસ્ય શિવે ગુરૌ ॥ ૬-૫૨॥

વર્ષકોટિં મહાભોગૈઃ શિવલોકે મહીયતે ।
પૂગતામ્બૂલપત્રાણામાધારં યો નિવેદયેત્ ॥ ૬-૫૩॥

વર્ષકોટ્યષ્ટકં ભોગૈઃ શિવલોકે મહીયતે ।
યશ્ચૂએણાધારસત્પાત્રં કસ્યાપિ વિનિવેદયેત્ ॥ ૬-૫૪॥

મોદતે સ શિવે લોકે વર્ષકોટીશ્ચતુર્દશ ।
મૃત્કાષ્ઠવંશખણ્ડાનિ યઃ પ્રદદ્યાચ્છિવાશ્રમે ॥ ૬-૫૫॥

પ્રાપ્નુયાદ્વિપુલાન્ભોગાન્દિવ્યાઞ્છિવપુરે નરઃ ।
માણિક્યં કલશં પાત્રીં સ્થાલ્યાદીન્ભાણ્ડસમ્પુટાન્ ॥ ૬-૫૬॥

દત્ત્વા શિવાગ્રજસ્તેભ્યઃ શિવલોકે મહીયતે ।
તોયાધારપિધાનાનિ મૃદ્વસ્ત્રતરુજાનિ વા ॥ ૬-૫૭॥

વંશાલાબુસમુત્થાનિ દત્ત્વાપ્નોતિ શિવં પુરમ્ ।
પઞ્ચસંમાર્જનીતોયં ગોમયાઞ્જનકર્પટાન્ ॥ ૬-૫૮॥

મૃત્કુમ્ભપીટિકાં દદ્યાદ્ભોગાઞ્છિવપુરે લભેત્ ।
યઃ પુષ્પધૂપગન્ધાનાં દધિક્ષીરઘૃતામ્ભસામ્ ॥ ૬-૫૯॥

દદ્યાદાધારપાત્રાણિ શિવલોકે સ ગચ્છતિ ।
વંશતાલાદિસંભૂતં પુષ્પાધારકરણ્ડકમ્ ॥ ૬-૬૦॥

ઇત્યેવમાદ્યાન્યો દદ્યાચ્છિવલોકમવાપ્નુયાત્ ।
યઃ સ્રુક્સ્રુવાદિપાત્રાણિ હોમાર્થં વિનિવેદયેત્ ॥ ૬-૬૧॥

વર્ષકોટિં મહાભાગૈઃ શિવલોકે મહીયતે ।
યઃ સર્વધાતુસંયુક્તં દદ્યાલ્લવણપર્વતમ્ ॥ ૬-૬૨॥

શિવાય ગુરવે વાપિ તસ્ય પુણ્યફલં શ◌ૃણુ ।
કલ્પકોટિસહસ્રાણિ કલ્પકોટિશતાનિ ચ ॥ ૬-૬૩॥

સ ગોત્રભૃત્યસંયુક્તો વસેચ્છિવપુરે નરઃ ।

વિમાનયાનૈઃ શ્રીમદ્ભિઃ સર્વકામસમન્વિતૈઃ ॥ ૬-૬૪॥

ભોગાન્ભુક્ત્વા તુ વિપુલાંસ્તદન્તે સ મહીપતિઃ ।
મનઃશિલાં હરીતાલં રાજપટ્ટં ચ હિઙ્ગુલમ્ ॥ ૬-૬૫॥

ગૈરિકં મણિદન્તં ચ હેમતોયં તથાષ્ટમમ્ ।
યશ્ચ તં પર્વતવરં શાલિતણ્ડુલકલ્પિતમ્ ॥ ૬-૬૬॥

શિવાયગુરવે વાપિ તસ્ય પુણ્યફલં શ‍ૃણુ ।
કલ્પકોટિશતં સાગ્રં ભોગાન્ભુઙ્ક્તે શિવે પુરે ॥ ૬-૬૭॥

યઃ સર્વધાન્યશિખરૈરુપેતં યવપર્વતમ્ ।
ઘૃતતૈલનદીયુક્તં તસ્ય પુણ્યફલં શ‍ૃણુ ॥ ૬-૬૮॥

કલ્પકોટિશતં સાગ્રં ભોગાન્ભુઙ્ક્તે શિવે પુરે ।
સમસ્તકુલજૈઃ સાર્ધં તસ્યાન્તે સ મહીપતિઃ ॥ ૬-૬૯॥

તિલધેનું પ્રદદ્યાદ્યઃ કૃત્વા કૃષ્ણાજિને નરઃ ।
કપિલાયાઃ પ્રદાનસ્ય યત્ફલં તદવાપ્નુયાત્ ॥ ૬-૭૦॥

ઘૃતધેનું નરઃ કૃત્વા કાંસ્યપાત્રે સકાઞ્ચનાન્ ।
નિવેદ્ય ગોપ્રદાનસ્ય સમગ્રં ફલમાપ્નુયાત્ ॥ ૬-૭૧॥

દ્વીપિચર્મણિ યઃ સ્થાપ્ય પ્રદદ્યાલ્લવણાઢકમ્ ।
અશેષરસદાનસ્ય યત્પુણ્યં તદવાપ્નુયાત્ ॥ ૬-૭૨॥

મરિચાઢેન કુર્વીત(?) મારીચં નામ પર્વતમ્ ।
દદ્યાદ્યજ્જીરકં પૂર્વમાગ્નેયં હિઙ્ગુમુત્તમમ્ ॥ ૬-૭૩॥

દક્ષિણે ગુડશુણ્ઠીં ચ નૈરૃતે નાગકેસરમ્ ।
પિપ્પલીં પશ્ચિમે દદ્યાદ્વાયવ્યે કૃષ્ણજીરકમ્ ॥ ૬-૭૪॥

કૌબેર્યામજમોદં ચ ત્વગેલાશ્ચેશદૈવતે ।
કુસ્તુમ્બર્યાઃ પ્રદેયાઃ સ્યુર્બહિઃ પ્રાકારતઃ સ્થિતાઃ ॥ ૬-૭૫॥

કકુભામન્તરાલેષુ સમન્તાત્સૈન્ધવં ન્યસેત્ ।
સપુષ્પાક્ષતતોયેન શિવાય વિનિવેદયેત્ ॥ ૬-૭૬॥

યાવત્તદ્દીપસંખ્યાનં સર્વમેકત્ર પર્વતે ।
તાવદ્વર્ષશતાદૂર્ધ્વં ભોગાન્ભુઙ્ક્તે શિવે પુરે ॥ ૬-૭૭॥

કૂશ્માણ્ડં મધ્યતઃ સ્થાપ્ય કાલિઙ્ગં પૂર્વતો ન્યસેત્ ।
દક્ષિણે ક્ષીરતુમ્બીં તુ વૃન્તાકં પશ્ચિમે ન્યસેત્ ॥ ૬-૭૮॥

પટીસાન્યુત્તરે સ્થાપ્ય કર્કટીમીશદૈવતે ।
ન્યસેદ્ગજપટોલાંશ્ચ મધુરાન્વહ્નિદૈવતે ॥ ૬-૭૯॥

કારવેલ્લાંશ્ચ નૈરૃત્યાં વાયવ્યાં નિમ્બકં ફલમ્ ।
ઉચ્ચાવચાનિ ચાન્યાનિ ફલાનિ સ્થાપયેદ્બહિઃ ॥ ૬-૮૦॥

અભ્યર્ચ્ય પુષ્પધૂપૈશ્ચ સમન્તાત્ફલપર્વતમ્ ।
શિવાય ગુરવે વાપિ પ્રણિપત્ય નિવેદયેત્ ॥ ૬-૮૧॥

યાવત્તત્ફલસંખ્યાનં તદ્દીપાનાં ચ મધ્યતઃ ।
તાવદ્વર્ષસહસ્રાણિ રુદ્રલોકે મહીયતે ॥ ૬-૮૨॥

મૂલકં મધ્યતઃ સ્થાપ્ય તત્પૂર્વે વાલમૂલકમ્ ।
આગ્નેય્યાં વાસ્તુકં સ્થાપ્ય યામ્યાયાં ક્ષારવાસ્તુકમ્ ॥ ૬-૮૩॥

પાલક્યં નૈરૃતે સ્થાપ્ય સુમુખં પશ્ચિમે ન્યસેત્ ।
કુહદ્રકં ચ વાયવ્યામુત્તરે વાપિ તાલિકીમ્ ॥ ૬-૮૪॥

કુસુમ્ભશાકમૈશાન્યાં સર્વશાકાનિ તદ્બહિઃ ।
પૂર્વક્રમેણ વિન્યસ્ય શિવાય વિનિવેદયેત્ ॥ ૬-૮૫॥

યાવત્તન્મૂલનાલાનાં પત્રસંખ્યા ચ કીર્તિતા ।
તાવદ્વર્ષસહસ્રાણિ રુદ્રલોકે મહીયતે ॥ ૬-૮૬॥

દત્ત્વા લભેન્મહાભોગાન્ગુગ્ગુલ્વદ્રેઃ પલદ્વયમ્ ।
વર્ષકોટિદ્વયં સ્વર્ગે દ્વિગુણં ગુડમિશ્રિતૈઃ ॥ ૬-૮૭॥

ગુડાર્દ્રકં સલવણમામ્રમઞ્જરિસંયુતમ્ ।
નિવેદ્ય ગુરવે ભક્ત્યા સૌભાગ્યં પરમં લભેત્ ॥ ૬-૮૮॥

હસ્તારોપ્યેણ વા કૃત્વા મહારત્નાન્વિતાં મહીમ્ ।
નિવેદયિત્વા શર્વાય શિવતુલ્યઃ પ્રજાયતે ॥ ૬-૮૯॥

વજ્રેન્દ્રનીલવૈડૂર્ય- પદ્મરાગં સમૌક્તિકમ્ ।
કીટપક્ષં સુવર્ણં ચ મહારત્નાનિ સપ્ત વૈ ॥ ૬-૯૦॥

યશ્ચ સિંહાસનં દદ્યાન્મહારત્નાન્વિતં નૃપઃ ।
ક્ષુદ્રરત્નૈશ્ચ વિવિધૈસ્તસ્ય પુણ્યફલં શૃણુ ॥ ૬-૯૧॥

કુલત્રિંશકસંયુક્તઃ સાન્તઃપુરપરિચ્છદઃ ।
સમસ્તભૃત્યસંયુક્તઃ શિવલોકે મહીયતે ॥ ૬-૯૨॥

તત્ર ભુક્ત્વા મહાભોગાન્શિવતુલ્યપરાક્રમઃ ।
આમહાપ્રલયં યાવત્તદન્તે મુક્તિમાપ્નુયાત્ ॥ ૬-૯૩॥

યદિ ચેદ્રાજ્યમાકઙ્ક્ષેત્તતઃ સર્વસમાહિતઃ ।
સપ્તદ્વીપસમુદ્રાયાઃ ક્ષિતેરધિપતિર્ભવેત્ ॥ ૬-૯૪॥

જન્મકોટિસહસ્રાણિ જન્મકોટિશતાનિ ચ ।
રાજ્યં કૃત્વા તતશ્ચાન્તે પુનઃ શિવપુરં વ્રજેત્ ॥ ૬-૯૫॥

એતદેવ ફલં જ્ઞેયં મકુટાભરણાદિષુ ।
રત્નાસનપ્રદાનેન પાદુકે વિનિવેદયેત્ ॥ ૬-૯૬॥

દદ્યાદ્યઃ કેવલં વજ્રં શુદ્ધં ગોધૂમમાત્રકમ્ ।
શિવાય સ શિવે લોકે તિષ્ઠેદાપ્રલયં સુખી ॥ ૬-૯૭॥

ઇન્દ્રનીલપ્રદાનેન સ વૈડૂર્યપ્રદાનતઃ ।
મોદતે વિવિધૈર્ભોગૈઃ કલ્પકોટિં શિવે પુરે ॥ ૬-૯૮॥

મસૂરમાત્રમપિ યઃ પદ્મરાગં સુશોભનમ્ ।
નિવેદયિત્વા શર્વાય મોદતે કાલમક્ષયમ્ ॥ ૬-૯૯॥

નિવેદ્ય મૌક્તિકં સ્વચ્છમેકભાગૈકમાત્રકમ્ ।
ભોગૈઃ શિવપુરે દિવ્યૈઃ કલ્પકોટિં પ્રમોદતે ॥ ૬-૧૦૦॥

કીટપક્ષં મહાશુદ્ધં નિવેદ્ય યવમાત્રકમ્ ।
શિવાયાદ્યઃ શિવે લોકે મોદતે કાલમક્ષયમ્ ॥ ૬-૧૦૧॥

હેમ્ના કૃત્વા ચ યઃ પુષ્પમપિ માષકમાત્રકમ્ ।
નિવેદયિત્વા શર્વાય વર્ષકોટિં વસેદ્દિવિ ॥ ૬-૧૦૨॥

ક્ષુદ્રરત્નાનિ યો દદ્યાદ્ધેમ્નિ બદ્ધાનિ શમ્ભવે ।
મોદતે સ શિવે લોકે કલ્પકોટ્યયુતં નરઃ ॥ ૬-૧૦૩॥

યથા યથા મહારત્નં શોભનં ચ યથા યથા ।
તથા તથા મહત્પુણ્યં જ્ઞેયં તચ્છિવદાનતઃ ॥ ૬-૧૦૪॥

ભૂમિભાગે સ(?)વિસ્તીર્ણે જમ્બૂદ્વીપં પ્રકલ્પયેત્ ।

અષ્ટાવરણસંયુક્તં નગેન્દ્રાષ્ટકભૂષિતમ્ ॥ ૬-૧૦૫॥

તન્મધ્યે કારયેદ્દિવ્યં મેરુપ્રાસાદમુત્તમમ્ ।
અનેકશિખરાકીર્ણમશેષામરસંયુતમ્ ॥ ૬-૧૦૬॥

બહિઃ સુવર્ણનિચિતં સર્વરત્નોપશોભિતમ્ ।
ચતુઃપ્રગ્રીવકોપેતં ચક્ષુર્લિઙ્ગસમાયુતમ્ ॥ ૬-૧૦૭॥

ચતુર્દિક્ષુ વનોપેતં ચતુર્ભિઃ સંયુતૈઃ શરૈઃ ।
ચતુર્ણાં પુરયુક્તેન પ્રાકારેણ ચ સંયુતમ્ ॥ ૬-૧૦૮॥

મેરુપ્રાસાદમિત્યેવં હેમરત્નવિભૂષિતમ્ ।
યઃ કારયેદ્વનોપેતં સો ઽનન્તફલમાપ્નુયાત્ ॥ ૬-૧૦૯॥

ભૂમ્યમ્ભઃપરમાણૂનાં યથા સંખ્યા ન વિદ્યતે ।
શિવાયતનપુણ્યસ્ય તથા સંખ્યા ન વિદ્યતે ॥ ૬-૧૧૦॥

કુલત્રિંશકસંયુક્તઃ સર્વભૃત્યસમન્વિતઃ ।
કલત્રપુત્રમિત્રૈશ્ચ સર્વસ્વજનસંયુતઃ ॥ ૬-૧૧૧॥

આશ્રિતોપાશ્રિતૈઃ સર્વૈરશેષગણસંયુતઃ ।
યથા શિવસ્તથૈવાયં શર્વલોકે સ પૂજ્યતે ॥ ૬-૧૧૨॥

ન ચ માનુષ્યકં લોકમાગચ્છેત્કૃપણં પુનઃ ।
સર્વજ્ઞઃ પરિપૂર્ણશ્ચ મુક્તઃ સ્વાત્મનિ તિષ્ઠતિ ॥ ૬-૧૧૩॥

યઃ શિવાય વનં કૃત્વા મુદાબ્દસલિલોત્થિતમ્(?) ।
તદ્દણ્ડકોપશોભં ચ હસ્તે કુર્વીત સર્વદા ॥ ૬-૧૧૪॥

શોભયેદ્ભૂતનાથં વા ચન્દ્રશાલાં ક્વચિત્ક્વચિત્ ।
વેદીં વાથાભ્યપદ્યન્ત પ્રોન્નતાઃ સ્તમ્ભપઙ્ક્તયઃ ॥ ૬-૧૧૫॥

શાતકુમ્ભમયીં વાપિ સર્વલક્ષણસંયુતામ્ ।
ઈશ્વરપ્રતિમાં સૌમ્યાં કારયેત્પુરુષોચ્છ્રિતામ્ ॥ ૬-૧૧૬॥

ત્રિશૂલસવ્યહસ્તાં ચ વરદાભયદાયિકામ્ ।
સવ્યહસ્તાક્ષમાલાં ચ જટાકુસુમભૂષિતામ્ ॥ ૬-૧૧૭॥

પદ્મસિંહાસનાસીનાં વૃષસ્થાં વા સમુચ્છ્રિતામ્ ।
વિમાનસ્થાં રથસ્થાં વા વેદિસ્થાં વા પ્રભાન્વિતામ્ ॥ ૬-૧૧૮॥

સૌમ્યવક્ત્રાં કરાલાં વા મહાભૈરવરૂપિણીમ્ ।
અત્યુચ્છ્રિતાં સુવિસ્તીર્ણાં નૃત્યસ્થાં યોગસંસ્થિતામ્ ॥ ૬-૧૧૯ ॥

કુર્યાદસંભવે હેમ્નસ્તારેણ વિમલેન ચ ।
આરકૂટમયીં વાપિ તામ્રમૃચ્છૈલદારુજામ્ ॥ ૬-૧૨૦ ॥

અશેષકૈઃ સરૂપૈશ્ચ વર્ણકૈર્વા પટે લિખેત્ ।
કુડ્યે વા ફલકે વાપિ ભક્ત્યા વિત્તાનુસારતઃ ॥ ૬-૧૨૧ ॥

એકાં સપરિવારાં વા પાર્વતીં ગણસંયુતામ્ ।
પ્રતીહારસમોપેતાં(?) કુર્યાદેવાવિકલ્પતઃ ॥ ૬-૧૨૨ ॥

પીઠં વા કારયેદ્રૌપ્યં તામ્રં પિત્તલસંભવમ્ ।
ચતુર્મુખૈકવક્ત્રં વા બહિઃ કાઞ્ચનસંસ્કૃતમ્ ॥ ૬-૧૨૩ ॥

પૃથક્પૃથગનેકાનિ કારયિત્વા મુખાનિ તુ ।
સૌમ્યભૈરવરૂપાણિ શિવસ્ય બહુરૂપિણઃ ॥ ૬-૧૨૪ ॥

નાનાભરણયુક્તાનિ હેમરૌપ્યકૃતાનિ ચ ।
શિવસ્ય રથયાત્રાયાં તાનિ લોકસ્ય દર્શયેત્ ॥ ૬-૧૨૫ ॥

ઉક્તાનિ યાનિ પુણ્યાનિ સંક્ષેપેણ પૃથક્પૃથક્ ।
કૃત્વૈકેન મમૈતેષામક્ષયં ફલમાપ્નુયાત્ ॥ ૬-૧૨૬ ॥

માતુઃ પિતુઃ સહોપાયૈર્(?) દશભિર્દશભિઃ કુલૈઃ ।
કલત્રપુત્રમિત્રાદ્યૈર્ભૃત્યૈર્યુક્તઃ સ બાન્ધવૈઃ ॥ ૬-૧૨૭ ॥

અયુતેન વિમાનાનાં સર્વકામયુતેન ચ ।
ભુઙ્ક્તે સ્વયં મહાભોગાનન્તે મુક્તિમવાપ્નુયાત્ ॥ ૬-૧૨૮ ॥

મણ્ડપસ્તમ્ભપર્યન્તે કીલયેદ્દર્પણાન્વિતમ્ ।
અભિષિચ્ય જના યસ્મિન્પુજાં કુવન્તિ બિલ્વકૈઃ ॥ ૬-૧૨૯ ॥

કાલકાલકૃતિં કૃત્વા કીલયેદ્યઃ શિવાશ્રમે ।
સર્વલોકોપકારાય પૂજયેચ્ચ દિને દિને ॥ ૬-૧૩૦ ॥

ધૂપવેલાપ્રમાણાર્થં કલ્પયેદ્યઃ શિવાશ્રમે ।
ક્ષરન્તીં પૂર્યમાણાં વા સદાયામે ઘટીં નૃપઃ ॥ ૬-૧૩૧ ॥

એષામેકતમં પુણ્યં કૃત્વા પાપવિવર્જિતઃ ।
શિવલોકે નરઃ પ્રાપ્ય સર્વજ્ઞઃ સ સુખી ભવેત્ ॥ ૬-૧૩૨ ॥

રથયાત્રાં પ્રવક્ષ્યામિ શિવસ્ય પરમાત્મનઃ ।
સર્વલોકહિતાર્થાય મહાશિલ્પિવિનિર્મિતામ્ ॥ ૬-૧૩૩ ॥

રથમધ્યે સમાવેશ્ય યથા યષ્ટિં તુ કીલયેત્ ।
યષ્ટેર્મધ્યે સ્થિતં કાર્યં વિમાનમતિશોભિતમ્ ॥ ૬-૧૩૪ ॥

પઞ્ચભૌમં ત્રિભૌમં વા દૃઢવંશપ્રકલ્પિતમ્ ।
કર્મણા સુનિબદ્ધં ચ રજ્જુભિશ્ચ સુસંયુતમ્ ॥ ૬-૧૩૫ ॥

પઞ્ચશાલાણ્ડિકૈર્યુક્તં નાનાભક્તિસમન્વિતમ્ ।
ચિત્રવર્ણપરિચ્છન્નં પટૈર્વા વર્ણકાન્વિતૈઃ ॥ ૬-૧૩૬ ॥

લમ્બકૈઃ સૂત્રદામ્ના ચ ઘણ્ટાચામરભૂષિતમ્ ।
બુદ્બુદૈરર્ધચન્દ્રૈશ્ચ દર્પણૈશ્ચ સમુજ્જ્વલમ્ ॥ ૬-૧૩૭ ॥

કદલ્યર્ધધ્વજૈર્યુક્તં મહાચ્છત્રં મહાધ્વજમ્ ।
પુષ્પમાલાપરિક્ષિપ્તં સર્વશોભાસમન્વિતમ્ ॥ ૬-૧૩૮ ॥

મહારથવિમાને ઽસ્મિન્સ્થાપયેદ્ગણસંયુતમ્ ।
ઈશ્વરપ્રતિમાં હેમ્નિ પ્રથમે પુરમણ્ડપે ॥ ૬-૧૩૯ ॥

મુખત્રયં ચ બધ્નીયાદ્બહિઃ કુર્યાત્તથાશ્રિતમ્ ।
પુરે પુરે બહિર્દિક્ષુ ગૃહકેષુ સમાશ્રિતમ્ ॥ ૬-૧૪૦ ॥

ચતુષ્કં શિવવક્ત્રાણાં સંસ્થાપ્ય પ્રતિપૂજયેત્ ।
દિનત્રયં પ્રકુર્વીત સ્નાનમર્ચનભોજનમ્ ॥ ૬-૧૪૧ ॥

નૃત્યક્રીડાપ્રયોગેણ ગેયમઙ્ગલપાઠકૈઃ ।
મહાવાદિત્રનિર્ઘોષૈઃ પૌષપૂર્ણિમપર્વણિ ॥ ૬-૧૪૨ ॥

ભ્રામયેદ્રાજમાર્ગેણ ચતુર્થે ઽહનિ તદ્રથમ્ ।
તતઃ સ્વસ્થાનમાનીય તચ્છેષમપિ વર્ધયેત્ ॥ ૬-૧૪૩ ॥

અવધાર્ય જગદ્ધાત્રી પ્રતિમામવતારયેત્ ।
મહાવિમાનયાત્રૈષા કર્તવ્યા પટ્ટકે ઽપિ વા ॥ ૬-૧૪૪ ॥

વંશૈર્નવૈઃ સુપક્વૈશ્ચ કટં કુર્યાદ્ભરક્ષમમ્(?) ।
વૃત્તં દ્વિગુણદીર્ઘં ચ ચતુરશ્રમધઃ સમમ્ ॥ ૬-૧૪૫ ॥

સર્વત્ર ચર્મણા બદ્ધં મહાયષ્ટિસમાશ્રિતમ્ ।

મુખં બદ્ધ્વં ચ કુર્વીત વંશમણ્ડલિના દૃઢમ્ ॥ ૬-૧૪૬॥

કટે ऽસ્મિંસ્તાનિ વસ્ત્રાણિ સ્થાપ્ય બધ્નીત યત્નતઃ ।
ઉપર્યુપરિ સર્વાણિ તન્મધ્યે પ્રતિમાં ન્યસેત્ ॥ ૬-૧૪૭॥

વર્ણકૈઃ કુઙ્કુમાદ્યૈશ્ચ ચિત્રપુષ્પૈશ્ચ પૂજયેત્ ।
નાનાભરણપૂજાભિર્મુક્તાહારપ્રલમ્બિભિઃ ॥ ૬-૧૪૮॥

રથસ્ય મહતો મધ્યે સ્થાપ્ય પટ્ટદ્વયં દૃઢમ્ ।
અધરોત્તરભાગેન મધ્યે છિદ્રસમન્વિતમ્ ॥ ૬-૧૪૯॥

કટિયષ્ટેરધોભાગં સ્થાપ્ય છિદ્રમયં શુભૈઃ ।
આબદ્ધ્ય કીલયેદ્યત્નાદ્યષ્ટ્યર્ધં ચ ધ્વજાષ્ટકમ્ ॥ ૬-૧૫૦॥

કટસ્ય પૃષ્ટં સર્વત્ર કારયેત્પટસંવૃતમ્ ।
તત્પટે ચ લિખેત્સોમં સગણં સવૃષં શિવમ્ ॥ ૬-૧૫૧॥

વિચિત્રપુષ્પસ્રગ્દામ્ના સમન્તાદ્ભૂષયેત્કટમ્ ।
રવકૈઃ કિઙ્કિણીજાલૈર્ઘણ્ટાચામરભૂષિતૈઃ ॥ ૬-૧૫૨॥

મહાપૂજાવિશેષૈશ્ચ કૌતૂહલસમન્વિતમ્ ।
વાદ્યારમ્ભોપચારેણ માર્ગશોભાં પ્રકલ્પયેત્ ॥ ૬-૧૫૩॥

તદ્રથં ભ્રામયેદ્યત્નાદ્રાજમાર્ગેણ સર્વતઃ ।
તતઃ સ્વાશ્રમમાનીય સ્થાપયેત્તત્સમીપતઃ ॥ ૬-૧૫૪॥

મહાશબ્દં તતઃ કુર્યાત્તાલત્રયસમન્વિતમ્ ।
તતસ્તુષ્ણીં સ્થિતે લોકે તચ્છાન્તિમિહ ધારયેત્ ॥ ૬-૧૫૫॥

શિવં તુ સર્વજગતઃ શિવં ગોબ્રાહ્મણસ્ય ચ ।
શિવમસ્તુ નૃપાણાં ચ તદ્ભક્તાનાં જનસ્ય ચ ॥ ૬-૧૫૬॥

રાજા વિજયમાપ્નોતિ પુત્રપૌત્રૈશ્ચ વર્ધતામ્ ।
ધર્મનિષ્ઠશ્ચ ભવતુ પ્રજાનાં ચ હિતે રતઃ ॥ ૬-૧૫૭॥

કાલવર્ષી તુ પર્જન્યઃ સસ્યસમ્પત્તિરુત્તમા ।
સુભિક્ષાત્ક્ષેમમાપ્નોતિ કાર્યસિદ્ધિશ્ચ જાયતામ્ ॥ ૬-૧૫૮॥

દોષાઃ પ્રયાન્તુ નાશં ચ ગુણાઃ સ્થૈર્યં ભજન્તુ વઃ ।
બહુક્ષીરયુતા ગાવો હૃષ્ટપુષ્ટા ભવન્તુ વઃ ॥ ૬-૧૫૯॥

એવં શિવમહાશાન્તિમુચ્ચાર્ય જગતઃ ક્રમાત્ ।
અભિવર્ધ્ય તતઃ શેષમૈશ્વરીં સાર્વકામિકીમ્ ॥ ૬-૧૬૦॥

શિવમાલાં સમાદાય સદાસીપરિચારિકઃ ।
ફલૈર્ભક્ષૈશ્ચ સંયુક્તાં ગૃહ્ય પાત્રીં નિવેશયેત્ ॥ ૬-૧૬૧॥

પાત્રીં ચ ધારયેન્મૂર્ધ્ના સોષ્ણીષાં દેવપુત્રકઃ ।
અલંકૃતઃ શુક્લવાસા ધાર્મિકઃ સતતં શુચિઃ ॥ ૬-૧૬૨॥

તતશ્ચ તાં સમુત્ક્ષિપ્ય પાણિના ધારયેદ્બુધઃ ।
પ્રબ્રૂયાદપરશ્ચાત્ર શિવધર્મસ્ય ભાજકઃ ॥ ૬-૧૬૩॥

તોયં યથા ઘટીસંસ્થમજસ્રં ક્ષરતે તથા ।
ક્ષરતે સર્વલોકાનાં તદ્વદાયુરહર્નિશમ્ ॥ ૬-૧૬૪॥

યદા સર્વં પરિત્યજ્ય ગન્તવ્યમવશૈર્ધ્રુવમ્ ।
તદા ન દીયતે કસ્માત્પાથેયાર્થમિદં ધનમ્ ॥ ૬-૧૬૫॥

કલત્રપુત્રમિત્રાણિ પિતા માતા ચ બાન્ધવાઃ ।
તિષ્ઠન્તિ ન મૃતસ્યાર્થે પરલોકે ધનાનિ ચ ॥ ૬-૧૬૬॥

નાસ્તિ ધર્મસમં મિત્રં નાસ્તિ ધર્મસમઃ સખા ।
યતઃ સર્વૈઃ પરિત્યક્તં નરં ધર્મો ઽનુગચ્છતિ ॥ ૬-૧૬૭॥

તસ્માદ્ધર્મં સમુદ્દિશ્ય યઃ શેષામભિવર્ધયેત્ ।
સમસ્તપાપનિર્મુક્તઃ શિવલોકં સ ગચ્છતિ ॥ ૬-૧૬૮॥

ઉપર્યુપરિ વિત્તેન યઃ શેષામભિવર્ધયેત્ ।
તસ્યેયમુત્તમા દેયા યતશ્ચાન્યા ન વર્ધતે ॥ ૬-૧૬૯॥

ઇત્યેવં મધ્યમાં શેષાં વર્ધયેદ્વા કનીયસીમ્ ।
તતસ્તેષાં પ્રદાતવ્યા સર્વશોકસ્ય શાન્તયે ॥ ૬-૧૭૦॥

યેનોત્તમા ગૃહીતા સ્યાચ્છિવશેષા મહીયસી ।
પ્રાપણીયા ગૃહં તસ્ય તથૈવ શિરસા વૃતા ॥ ૬-૧૭૧॥

ધ્વજચ્છત્રવિમાનાદ્યૈર્મહાવાદિત્રનિઃસ્વનૈઃ ।
ગૃહદ્વારં તતઃ પ્રાપ્તમર્ચયિત્વા નિવેશયેત્ ॥ ૬-૧૭૨॥

દદ્યાદ્ગોત્રકલત્રાણાં ભૃત્યાનાં સ્વજનસ્ય ચ ।
તર્પયેચ્ચાનતાન્(?) ભક્ત્યા વાદિત્રધ્વજવાહકાન્ ॥ ૬-૧૭૩॥

એવમાદીયતે ભક્ત્યા યઃ શિવસ્યોત્તમા ગૃહે ।
શોભયા રાજમાર્ગેણ તસ્ય ધર્મફલં શ‍ૃણુ ॥ ૬-૧૭૪॥

સમસ્તપાપનિર્મુક્તઃ સમસ્તકુલસંયુતઃ ।
શિવલોકમવાપ્નોતિ સભૃત્યપરિચારકઃ ॥ ૬-૧૭૫॥

તત્ર દિવ્યૈર્મહાભોગૈર્વિમાનૈઃ સાર્વકામિકૈઃ ।
કલ્પાનાં ક્રીડતે કોટિમન્તે નિર્વાણમાપ્નુયાત્ ॥ ૬-૧૭૬॥

રથસ્ય યાત્રાં યઃ કુર્યાદિત્યેવમુપશોભયા ।
ભક્ષભોજ્યપ્રદાનૈશ્ચ તત્ફલં શ‍ૃનુ યત્નતઃ ॥ ૬-૧૭૭॥

અશેષપાપનિર્મુક્તઃ સર્વભૃત્યસમન્વિતઃ ।
કુલત્રિંશકમુદ્ધૃત્ય સુહૃદ્ભિઃ સ્વજનૈઃ સહ ॥ ૬-૧૭૮॥

સર્વકામયુતૈર્દિવ્યૈઃ સ્વચ્છન્દગમનાલયૈઃ ।
મહાવિમાનૈઃ શ્રીમદ્ભિર્દિવ્યસ્ત્રીપરિવારિતઃ ॥ ૬-૧૭૯॥

ઇચ્છયા ક્રીડતે ભોગૈઃ કલ્પકોટિં શિવે પુરે ।
જ્ઞાનયોગં તતઃ પ્રાપ્ય સંસારાદવમુચ્યતે ॥ ૬-૧૮૦॥

શિવસ્ય રથયાત્રાયામુપવાસપરઃ ક્ષમી ।
પુરતઃ પૃષ્ઠતો વાપિ ગચ્છંસ્તસ્ય ફલં શ‍ૃણુ ॥ ૬-૧૮૧॥

અશેષપાપનિર્મુક્તઃ શુદ્ધઃ શિવપુરં ગતઃ ।
મહારથોપમૈર્યાનૈઃ કલ્પાશીતિં પ્રમોદતે ॥ ૬-૧૮૨॥

ધ્વજચ્છત્રપતાકાભિર્દીપદર્પણચામરૈઃ ।
ધૂપૈર્વિતાનકલશૈરુપશોભા સહસ્રશઃ ॥ ૬-૧૮૩॥

ગૃહીત્વા યાતિ પુરતઃ સ્વેચ્છયા વા પરેચ્છયા ।
સમ્પર્કાત્કૌતુકાલ્લાભાચ્છિવલોકે વ્રજન્તે તે ॥ ૬-૧૮૪॥

શિવસ્ય રથયાત્રાં તુ યઃ પ્રપશ્યતિ ભક્તિતઃ ।
પ્રસઙ્ગાત્કૌતુકાદ્વાપિ તે ઽપિ યાન્તિ શિવં પુરમ્ ॥ ૬-૧૮૫॥

નાનાયત્નાદિશેષાન્તે નાનાપ્રેક્ષણકાનિ ચ ।
કુર્વીત રથયાત્રાયાં રમતે ચ વિભૂષિતા ॥ ૬-૧૮૬॥

તે ભોગૈર્વિવિધૈર્દિવ્યૈઃ શિવાસન્ના ગણેશ્વરાઃ ।

ક્રીડન્તિ રુદ્રભવને કલ્પાનાં વિંશતીર્નરાઃ ॥ ૬-૧૮૭॥

મહતા જ્ઞાનસઙ્ઘેન તસ્માચ્છિવરથેન ચ ।
પૃથક્જીવા મૃતા યાન્તિ શિવલોકં ન સંશયઃ ॥ ૬-૧૮૮॥

શ્રીપર્વતે મહાકાલે વારાણસ્યાં મહાલયે ।
જલ્પેશ્વરે કુરુક્ષેત્રે કેદારે મણ્ડલેશ્વરે ॥ ૬-૧૮૯॥

ગોકર્ણે ભદ્રકર્ણે ચ શઙ્કુકર્ણે સ્થલેશ્વરે ।
ભીમેશ્વરે સુવર્ણાક્ષે કાલઞ્જરવને તથા ॥ ૬-૧૯૦॥

એવમાદિષુ ચાન્યેષુ શિવક્ષેત્રેષુ યે મૃતાઃ ।
જીવાશ્ચરાચરાઃ સર્વે શિવલોકં વ્રજન્તિ તે ॥ ૬-૧૯૧॥

પ્રયાગં કામિકં તીર્થમવિમુક્તં તુ નૈષ્ઠિકમ્ ।
શ્રીપર્વતં ચ વિજ્ઞેયમિહામુત્ર ચ સિદ્ધિદમ્ ॥ ૬-૧૯૨॥

પ્રસઙ્ગેનાપિ યઃ પશ્યેદન્યત્ર પ્રસ્થિતઃ ક્વચિત્ ।
શ્રીપર્વતં મહાપુણ્યં સો ઽપિ યાતિ શિવં પુરમ્ ॥ ૬-૧૯૩॥

વ્રજેદ્યઃ શિવતીર્થાનિ સર્વપાપૈઃ પ્રમુચ્યતે ।
પાપયુક્તઃ શિવજ્ઞાનં પ્રાપ્ય નિર્વાણમાપ્નુયાત્ ॥ ૬-૧૯૪॥

તીર્થસ્થાનેષુ યઃ શ્રાદ્ધં શિવરાત્રે પ્રયત્નતઃ ।
કલ્પયિત્વાનુસારેણ કાલસ્ય વિષુવસ્ય ચ ॥ ૬-૧૯૫॥

તીર્થયાત્રાગતં શાન્તં હાહાભૂતમચેતનમ્ ।
ક્ષુત્પિપાસાતુરં લોકે પાંસુપાદં ત્વરાન્વિતમ્ ॥ ૬-૧૯૬॥

સંતર્પયિત્વા યત્નેન મ્લાનલક્ષ્મીમિવામ્બુભિઃ ।
પાદ્યાસનપ્રદાનેન કસ્તેન પુરુષઃ સમઃ ॥ ૬-૧૯૭॥

અશ્નન્તિ યાવત્તત્પિણ્ડં તીર્થનિર્ધૂતકલ્મષાઃ ।
તાવદ્વર્ષસહસ્રાણિ તદ્દાતાસ્તે શિવે પુરે ॥ ૬-૧૯૮॥

દદ્યાદ્યઃ શિવસત્રાર્થં મહિષીં સુપયસ્વિનીમ્ ।
મોદતે સ શિવે લોકે યુગકોટિશતં નરઃ ॥ ૬-૧૯૯॥

આર્તાય શિવભક્તાય દદ્યાદ્યઃ સુપયસ્વિનીમ્ ।
અજામેકાં સુપુષ્ટાઙ્ગીં તસ્ય પુણ્યફલં શ઼ૃણુ ॥ ૬-૨૦૦॥

યાવત્તદ્રોમસંખ્યાનં તત્પ્રસૂતિકુલેષુ ચ ।
તાવદ્વર્ષસહસ્રાણિ રુદ્રલોકે મહીયતે ॥ ૬-૨૦૧॥

મૃદુરોમાઞ્ચિતાં કૃષ્ણાં નિવેદ્ય ગુરવે નરઃ ।
રોમ્ણિ રોમ્ણિ સુવર્ણસ્ય દત્તસ્ય ફલમાપ્નુયાત્ ॥ ૬-૨૦૨॥

ગજાશ્વરથસંયુક્તૈર્વિમાનૈઃ સાર્વકામિકૈઃ ।
સાનુગઃ ક્રીડતે ભોગૈઃ કલ્પકોટિં શિવે પુરે ॥ ૬-૨૦૩॥

નિવેદ્યાશ્વતરં પુષ્ટમદુષ્ટં ગુરવે નરઃ ।
સંગતિં સોપકરણં ભોગાન્ભુઙ્ક્તે શિવે પુરે ॥ ૬-૨૦૪॥

દિવ્યાશ્વયુક્તૈઃ શ્રીમદ્ભિર્વિમાનૈઃ સાર્વકામિકૈઃ ।
કોટિં કોટિં ચ કલ્પાનાં તદન્તે સ્યાન્મહીપતિઃ ॥ ૬-૨૦૫॥

અપિ યોજનમાત્રાય શિબિકાં પરિકલ્પયેત્ ।
ગુરોઃ શાન્તસ્ય દાન્તસ્ય તસ્ય પુણ્યફલં શ‍ૃણુ ॥ ૬-૨૦૬॥

વિમાનાનાં સહસ્રેણ સર્વકામયુતેન ચ ।
કલ્પકોટ્યયુતં સાગ્રં ભોગાન્ભુઙ્ક્તે શિવે પુરે ॥ ૬-૨૦૭॥

છાગં મેષં મયૂરં ચ કુક્કુટં શારિકાં શુકમ્ ।
બાલક્રીડનકાનેતાનિત્યાદ્યાનપરાનપિ ॥ ૬-૨૦૮॥

નિવેદયિત્વા સ્કન્દાય તત્સાયુજ્યમવાપ્નુયાત્ ।
ભુક્ત્વા તુ વિપુલાન્ભોગાંસ્તદન્તે સ્યાદ્દ્વિજોત્તમઃ ॥ ૬-૨૦૯॥

મુસલોલૂખલાદ્યાનિ ગૃહોપકરણાનિ ચ ।
દદ્યાચ્છિવગૃહસ્થેભ્યસ્તસ્ય પૂણ્યફલં શ‍ૃણુ ॥ ૬-૨૧૦॥

પ્રત્યેકં કલ્પમેકૈકં ગૃહોપકરણૈર્નરઃ ।
અન્તે દિવિ વસેદ્ભોગૈસ્તદન્તે ચ ગૃહી ભવેત્ ॥ ૬-૨૧૧॥

ખર્જૂરતાલપત્રૈર્વા ચર્મણા વા સુકલ્પિતમ્ ।
દત્ત્વા કોટ્યાસનં વૃત્તં શિવલોકમવાપ્નુયાત્ ॥ ૬-૨૧૨॥

પ્રાતર્નીહારવેલાયાં હેમન્તે શિવયોગિનામ્ ।
કૃત્વા પ્રતાપનાયાગ્નિં શિવલોકે મહીયતે ॥ ૬-૨૧૩॥

સૂર્યાયુતપ્રભાદીપ્તૈર્વિમાનૈઃ સાર્વકામિકૈઃ ।
કલ્પકોટિશતં ભોગાન્ભુક્ત્વા સ તુ મહીપતિઃ ॥ ૬-૨૧૪॥

યઃ પ્રાન્તરં વિદેશં વા ગચ્છન્તં શિવયોગિનમ્ ।
ભોજયીત યથાશક્ત્યા શિવલોકે મહીયતે ॥ ૬-૨૧૫॥

યશ્છત્રં ધારયેદ્ગ્રીષ્મે ગચ્છતે શિવયોગિને ।
સ મૃતઃ પૃથિવીં કૃત્સ્નામેકચ્છત્રામવાપ્નુયાત્ ॥ ૬-૨૧૬॥

યઃ સમુદ્ધરતે માર્ગે માત્રોપકરણાસનમ્ ।
શિવયોગપ્રવૃત્તસ્ય તસ્ય પુણ્યફલં શ‍ૃણુ ॥ ૬-૨૧૭॥

કલ્પાયુતં નરઃ સાગ્રં ભુક્ત્વા ભોગાઞ્છિવે પુરે ।
તદન્તે પ્રાપ્નુયાદ્રાજ્યં સર્વૈશ્વર્યસમન્વિતમ્ ॥ ૬-૨૧૮॥

અભ્યઙ્ગોદ્વર્તનં સ્નાનમાર્તસ્ય શિવયોગિનઃ ।
કૃત્વાપ્નોતિ મહાભોગાન્કલ્પાઞ્છિવપુરે નરઃ ॥ ૬-૨૧૯॥

અપનીય સમુચ્છિષ્ટં ભક્તિતઃ શિવયોગિનામ્ ।
દશધેનુપ્રદાનસ્ય ફલમાપ્નોતિ માનવઃ ॥ ૬-૨૨૦॥

પઞ્ચગવ્યસમં જ્ઞેયમુચ્છિષ્ટં શિવયોગિનામ્ ।
તદ્ભુક્ત્વા લભતે શુદ્ધિં મહતઃ પાતકાદપિ ॥ ૬-૨૨૧॥

નારી ચ ભુક્ત્વા સત્પુત્રં કુલાધારં ગુણાન્વિતમ્ ।
રાજ્યયોગ્યં ધનાઢ્યં ચ પ્રાપ્નુયાદ્ધર્મતત્પરમ્ ॥ ૬-૨૨૨॥

યશ્ચ યાં શિવયજ્ઞાય ગૃહસ્થઃ પરિકલ્પયેત્ ।
શિવભક્તો ઽસ્ય મહતઃ પરમં ફલમાપ્નુયાત્ ॥ ૬-૨૨૩॥

શિવોમાં ચ પ્રયત્નેન ભક્ત્યાબ્દં યો ઽનુપાલયેત્ ।
ગવાં લક્ષપ્રદાનસ્ય સમ્પૂર્ણં ફલમાપ્નુયાત્ ॥ ૬-૨૨૪॥

પ્રાતઃ પ્રદદ્યાત્સઘૃતં સુકૃતં બાલપિણ્ડકમ્ ।
દૂર્વાં ચ બાલવત્સાનાં(?) તસ્ય પુણ્યફલં શ‍ૃણુ ॥ ૬-૨૨૫॥

યાવત્તદ્બાલવત્સાનાં પાનાહારં પ્રકલ્પયેત્ ।
તાવદષ્ટાયુતાન્પૂર્વૈર્ભોગાન્ભુઙ્ક્તે શિવે પુરે ॥ ૬-૨૨૬॥

વિધવાનાથવૃદ્ધાનાં પ્રદદ્યાદ્યઃ પ્રજીવનમ્ ।
આભૂતસ્સમ્પ્લવં યાવચ્છિવલોકે મહીયતે ॥ ૬-૨૨૭॥

દદ્યાદ્યઃ સર્વજન્તૂનામાહારમનુયત્નતઃ ।

ત્રિઃ પૃથ્વીં રત્નસમ્પૂર્ણાં યદ્દત્ત્વા તત્ફલં લભેત્ ॥ ૬-૨૨૮॥

વિનયવ્રતદાનાનિ યાનિ સિદ્ધાનિ લોકતઃ ।
તાનિ તેનૈવ વિધિના શિવમન્ત્રેણ કલ્પયેત્ ॥ ૬-૨૨૯॥

નિવેદયીત રુદ્રાય રુદ્રાણ્યાઃ ષણ્મુખસ્ય ચ ।
પ્રાપ્નુયાદ્વિપુલાન્ભોગાન્દિવ્યાઞ્છિવપુરે નરઃ ॥ ૬-૨૩૦॥

પુનર્યઃ કર્તરીં દદ્યાત્કેશક્લેશાપનુત્તયે ।
સર્વક્લેશવિનિર્મુક્તઃ શિવલોકે સુખી ભવેત્ ॥ ૬-૨૩૧॥

નાસિકાશોધનં દદ્યાત્સંદંશં શિવયોગિને ।
વર્ષકોટિં મહાભોગૈઃ શિવલોકે મહીયતે ॥ ૬-૨૩૨॥

નખચ્છેદનકં દત્ત્વા શિવલોકે મહીયતે ।
વર્ષલક્ષં મહાભોગૈઃ શિવલોકે મહીયતે ॥ ૬-૨૩૩॥

દત્ત્વાઞ્જનશલાકાં વા લોહાદ્યાં શિવયોગિને ।
ભોગાઞ્છિવપુરે પ્રાપ્ય જ્ઞાનચક્ષુરવાપ્નુયાત્ ॥ ૬-૨૩૪॥

કર્ણશોધનકં દત્ત્વા લોહાદ્યં શિવયોગિને ।
વર્ષકોટિં મહાભોગૈઃ શિવલોકે મહીયતે ॥ ૬-૨૩૫॥

દદ્યાદ્યઃ શિવભક્તાય સૂચીં કૌપીનશોધનીમ્ ।
વર્ષલક્ષં સ લક્ષાર્ધં શિવલોકે મહીયતે ॥ ૬-૨૩૬॥

નિવેદ્ય શિવયોગિભ્યઃ સૂચિકં સૂત્રસંયુતમ્ ।
વર્ષલક્ષં મહાભોગૈઃ ક્રીડતે સ શિવે પુરે ॥ ૬-૨૩૭॥

દદ્યાદ્યઃ શિવયોગિભ્યઃ સુકૃતાં પત્રવેધનીમ્ ।
વર્ષલક્ષં મહાભોગૈઃ શિવલોકે મહીયતે ॥ ૬-૨૩૮॥

દદ્યાદ્યઃ પુસ્તકાદીનાં સર્વકાર્યાર્થકર્તૃકામ્ ।
પઞ્ચલક્ષં મહાભોગૈર્મોદતે સ શિવે પુરે ॥ ૬-૨૩૯॥

શમીન્ધનતૃણાદીનાં દદ્યાત્તચ્છેદનં ચ યઃ ।
ક્રીડતે સ શિવે લોકે વર્ષલક્ષચતુષ્ટયમ્ ॥ ૬-૨૪૦॥

શિવાશ્રમોપભોગાય લોહોપકરણં મહત્ ।
યઃ પ્રદદ્યાત્કુઠારાદ્યં તસ્ય પુણ્યફલં શ઼ૃણુ ॥ ૬-૨૪૧॥

યાવત્તત્ફલસંખ્યાનં લોહોપકરણે ભવેત્ ।
તાવન્તિ વર્ષલક્ષાણિ શિવલોકે મહીયતે ॥ ૬-૨૪૨॥

શિવાયતનવિત્તાનાં રક્ષાર્થં યઃ પ્રયચ્છતિ ।
ધનુઃખડ્ગાયુધાદીનિ તસ્ય પુણ્યફલં શ‍ૃણુ ॥ ૬-૨૪૩॥

એકૈકસ્મિન્પરિજ્ઞેયમાયુધે ચાપિ વૈ ફલમ્ ।
વર્ષકોટ્યષ્ટકં ભોગૈઃ શિવલોકે મહીયતે ॥ ૬-૨૪૪॥

યઃ સ્વાત્મભોગભૃત્યર્થં કુસુમાનિ નિવેદયેત્ ।
શિવાય ગુરવે વાપિ તસ્ય પુણ્યફલં શ‍ૃણુ ॥ ૬-૨૪૫॥

યાવદન્યોઽન્યસંબન્ધાસ્તસ્યાંશાઃ પરિકીર્તિતાઃ ।
વર્ષલક્ષં સ તાવચ્ચ શિવલોકે પ્રમોદતે ॥ ૬-૨૪૬॥

નષ્ટાપહૃતમન્વિષ્ય પુનર્વિત્તં નિવેદયેત્ ।
શિવાત્મકં શિવાયૈવ તસ્ય પુણ્યફલં શ‍ૃણુ ॥ ૬-૨૪૭ ॥

યાવચ્છિવાય તદ્વિત્તં પ્રાઙ્નિવેદ્ય ફલં સ્મૃતમ્ ।
નષ્ટમાનીય તદ્ભૂયઃ પુણ્યં શતગુણં લભેત્ ॥ ૬-૨૪૮॥

દેવદ્રવ્યં હૃતં નષ્ટમન્વેષ્યમપિ યત્નતઃ ।
ન પ્રાપ્નોતિ તદા તસ્ય પ્રાપ્નુયાદ્દ્વિગુણં ફલમ્ ॥ ૬-૨૪૯॥

તામ્રકુમ્ભકટાહાદ્યં યઃ શિવાય નિવેદયેત્ ।
શિવાત્મકં શિવાયૈવ તસ્ય પુણ્યફલં શ‍ૃણુ ॥ ૬-૨૫૦॥

યાવચ્છિવાય તદ્વિત્તં પ્રાઙ્નિવેદ્ય ફલં સ્મૃતમ્ ।
નષ્ટમાનીય તદ્ભૂયઃ પુણ્યં શતગુણં લભેત્ ॥ ૬-૨૫૧॥

સ્નાનસત્ત્રોપભોગાય તસ્ય પુણ્યફલં શ‍ૃણુ ।
યાવત્તત્ફલસંખ્યાનં તામ્રોપકરણે સ્થિતમ્ ॥ ૬-૨૫૨॥

પલે પલે વર્ષકોટિં મોદતે સ શિવે પુરે ।
યઃ પત્રપુષ્પવસ્તૂનાં દદ્યાદાધારભાજનમ્ ॥ ૬-૨૫૩॥

તદ્વસ્તુદાતુર્યત્પુણ્યં તત્પુણ્યં સકલં ભવેત્ ।
દત્ત્વોપકરણં કિંચિદપિ યો વિત્તમર્થિનામ્ ॥ ૬-૨૫૪॥

યદ્વસ્તુ કુરુતે તેન તત્પ્રદાનફલં લભેત્ ।
યઃ શૌચપીતવસ્ત્રાણિ ક્ષારાદ્યૈઃ શિવયોગિનામ્ ॥ ૬-૨૫૫॥

સ પાપમલનિર્મુક્તઃ શિવલોકમવાપ્નુયાત્ ।
યઃ પુષ્પપટ્ટસંયુક્તં પટગર્ભં ચ કમ્બલમ્ ॥ ૬-૨૫૬॥

પ્રદદ્યાચ્છિવયોગિભ્યસ્તસ્ય પુણ્યફલં શ‍ृણુ ।
તેષાં ચ વસ્ત્રતન્તૂનાં યાવત્સંખ્યા વિધીયતે ॥ ૬-૨૫૭॥

તાવદ્વર્ષસહસ્રાણિ ભોગાન્ભુઙ્ક્તે શિવે પુરે ।
શ્લક્ષ્ણવસ્ત્રાણિ શુક્લાનિ દદ્યાદ્યઃ શિવયોગિને ॥ ૬-૨૫૮॥

ચિત્રવસ્ત્રાણિ તદ્ભક્ત્યા તસ્ય પુણ્યફલં શ‍ृણુ ।
યાવત્તત્સૂક્ષ્મવસ્ત્રાણાં તન્તુસંખ્યા વિધીયતે ॥ ૬-૨૫૯॥

તાવદ્યુગાનિ સંભોગૈઃ શિવલોકે મહીયતે ।
શઙ્ખપાત્રં તુ વિસ્તીર્ણં ભાણ્ડં વાપિ સુશોભનમ્ ॥ ૬-૨૬૦॥

પ્રદદ્યાચ્છિવયોગિભ્યસ્તસ્ય પુણ્યફલં શ‍ृણુ ।
દિવ્યં વિમાનમારૂઢઃ સર્વકામસમન્વિતમ્ ॥ ૬-૨૬૧॥

કલ્પકોટ્યયુતં સાગ્રં શિવલોકે મહીયતે ।
શુક્ત્યાદીનિ ચ પાત્રાણિ શોભનાન્યમલાનિ ચ ॥ ૬-૨૬૨॥

નિવેદ્ય શિવયોગિભ્યઃ શઙ્ખાર્ધેન ફલં લભેત્ ।
સ્ફાટિકાનાં ચ પાત્રાણાં શઙ્ખતુલ્યફલં સ્મૃતમ્ ॥ ૬-૨૬૩॥

શૈલજાનાં તદર્ધેન પાત્રાણાં ચ તદર્ધકમ્ ।
તાલખર્જૂરપાત્રાણાં વંશજાનાં નિવેદને ॥ ૬-૨૬૪॥

અન્યેષામેવમાદીનાં પુણ્યં વાર્ક્ષ્યાર્ધસંમિતમ્ ।
વંશજાર્ધસમં પુણ્યં ફલપાત્રનિવેદને ॥ ૬-૨૬૫॥

નાનાપર્ણપુટાણાં ચ સારાણાં વા ફલાર્ધકમ્ ।
યસ્તામ્રકાંસ્યપાત્રાણિ શોવ્હનાન્યમલાનિ ચ ॥ ૬-૨૬૬॥

સ્નાનભોજનપાનાર્થં દદ્યાદ્યઃ શિવયોગિને ।
તામ્રાં કાંસીં ત્રિલોહીં વા યઃ પ્રદદ્યાત્ત્રિપાદિકામ્ ॥ ૬-૨૬૭॥

ભોજને ભોજનાધારં ગુરવે તત્ફલં શ‍ृણુ ।
યાવત્તત્પલસંખ્યાનં ત્રિપાદ્યા ભોજનેષુ ચ ॥ ૬-૨૬૮॥

તાવદ્યુગસહસ્રાણિ ભોગાન્ભુઙ્ક્તે શિવે પુરે ।

લોહં ત્રિપાદિકં દત્ત્વા સત્કૃત્વા શિવયોગિને ॥ ૬-૨૬૯॥

દશકલ્પાન્મહાભોગૈર્નરઃ શિવપુરે વસેત્ ।
યઃ પ્રદદ્યાત્ત્રિવિષ્ટમ્ભં ભિક્ષાપાત્રસમાશ્રયમ્ ॥ ૬-૨૭૦॥

વંશજં દારુજં વાપિ તસ્ય પુણ્યફલં શ‍ૃણુ ।
દિવ્યસ્ત્રીભોગસમ્પન્નો વિમાને મહતિ સ્થિતઃ ॥ ૬-૨૭૧॥

ચતુર્યુગસહસ્રં તુ ભોગાન્ભુઙ્ક્તે શિવે પુરે ।
ભિક્ષાપાત્રમુખાચ્છાદમ્વસ્ત્રપર્ણાદિકલ્પિતમ્ ॥ ૬-૨૭૨॥

દત્ત્વા શિવપુરે ભોગાન્કલ્પમેકં વસેન્નરઃ ।
સંશ્રયં યઃ પ્રદદ્યાચ્ચ ભિક્ષાપાત્રે કમણ્ડલૌ ॥ ૬-૨૭૩॥

કલ્પિતં વસ્ત્રસૂત્રાદ્યૈસ્તસ્ય પુણ્યફલં શ‍ૃણુ ।
તદ્વસ્ત્રપૂતતન્તૂનાં સંખ્યા યાવદ્વિધીયતે ॥ ૬-૨૭૪॥

તાવદ્વર્ષસહસ્રાણિ રુદ્રલોકે મહીયતે ।
સૂત્રવલ્કલવાલૈર્વા શિક્યભાણ્ડસમાશ્રયમ્ ॥ ૬-૨૭૫॥

યઃ કૃત્વા દામનીયોક્ત્રં પ્રગ્રહં રજ્જુમેવ વા ।
એવમાદીનિ ચાન્યાનિ વસ્તૂનિ વિનિવેદયેત્ ॥ ૬-૨૭૬॥

શિવગોષ્ઠોપયોગાર્થં તસ્ય પુણ્યફલં શ‍ૃણુ ।
યાવત્તદ્રજ્જુસંખ્યાનં પ્રદદ્યાચ્છિવગોકુલે ॥ ૬-૨૭૭॥

તાવચ્ચતુર્યુગં દેહી શિવલોકે મહીયતે ।
યથા યથા પ્રિયં વસ્ત્રં શોભનં ચ યથા યથા ॥ ૬-૨૭૮ ॥

તથા તથા મહાપુણ્યં તદ્દાનાદુત્તરોત્તરમ્ ।
યઃ પન્થાનં દિશેત્પૃષ્ટં પ્રણષ્ટં ચ ગવાદિકમ્ ॥ ૬-૨૭૯॥

સ ગોદાનસમં પુણ્યં પ્રજ્ઞાસૌખ્યં ચ વિન્દતિ ।
કૃત્વોપકારમાર્તાનાં સ્વર્ગં યાતિ ન સંશયઃ ॥ ૬-૨૮૦॥

અપિ કણ્ટકમુદ્ધૃત્ય કિમુતાન્યં મહાગુણમ્(?) ।
અન્નપાનૌષધીનાં ચ યઃ પ્રદાતારમુદ્દિશેત્ ॥ ૬-૨૮૧॥

આર્તાનાં તસ્ય વિજ્ઞેયં દાતુસ્તત્સદૃશં ફલમ્ ।
શિવાય તસ્ય સંરુદ્ધં કર્મ તિષ્ઠતિ યદ્વિના ॥ ૬-૨૮૨॥

તદલ્પમપિ યજ્ઞાઙ્ગં દત્ત્વા યજ્ઞફલં લભેત્ ।
અપિ કાશકુશં સૂત્રં ગોમયં સમિદિન્ધનમ્ ॥ ૬-૨૮૩ ॥

શિવયજ્ઞોપયોગાર્થં પ્રવક્ષ્યામિ સમાસતઃ ।
સર્વેષાં શિવભક્તાનાં દદ્યાદ્યત્કિંચિદાદરાત્ ।
દત્ત્વા યજ્ઞફલં વિદ્યાત્કિમુ તદ્વસ્તુદાનતઃ ॥ ૬-૨૮૪ ॥

॥ ઇતિ શિવોપનિષદિ ફલોપકરણપ્રદાનાધ્યાયઃ ષષ્ઠઃ ॥

---

અથ સ્વર્ગાપવર્ગાર્થે પ્રવક્ષ્યામિ સમાસતઃ ।
સર્વેષાં શિવભક્તાનાં શિવાચારમનુત્તમમ્ ॥ ૭-૧ ॥

શિવઃ શિવાય ભૂતાનાં યસ્માદ્વાનં પ્રયચ્છતિ ।
ગુરુમૂર્તિઃ સ્થિતસ્તસ્માત્પૂજયેત્સતતં ગુરુમ્ ॥ ૭-૨ ॥

નાલક્ષણે યથા લિઙ્ગે સાંનિધ્યં કલ્પયેચ્છિવઃ ।
અલ્પાગમે ગુરૌ તદ્વત્સાંનિધ્યં ન પ્રકલ્પયેત્ ॥ ૭-૩ ॥

શિવજ્ઞાનાર્થતત્ત્વજ્ઞઃ પ્રસન્નમનસં ગુરુમ્ ।
શિવઃ શિવં સમાસ્થાય જ્ઞાનં વક્તિ ન હીતરઃ ॥ ૭-૪ ॥

ગુરું ચ શિવવદ્ભક્ત્યા નમસ્કારેણ પૂજયેત્ ।
કૃતાઞ્જલિસ્ત્રિસંધ્યં ચ ભૂમિવિન્યસ્તમસ્તકઃ ॥ ૭-૫ ॥

ન વિવિક્તમનાચાન્તમ્(?) ચઙ્ક્રમન્તં તથાકુલમ્ ।
સમાધિસ્થં વ્રજન્તં ચ નમસ્કુર્યાદ્ગુરું બુધઃ ॥ ૭-૬ ॥

વ્યાખ્યાને તત્સમાપ્તૌ ચ સમ્પ્રશ્ને સ્નાનભોજને ।
ભુક્ત્વા ચ શયને સ્વપ્ને નમસ્કુર્યાત્સદા ગુરુમ્ ॥ ૭-૭ ॥

ગ્રામાન્તરમભિપ્રેપ્સુર્ગુરોઃ કુર્યાત્પ્રદક્ષિણમ્ ।
સાર્વાઙ્ગિકપ્રણામં ચ પુનઃ કુર્યાત્તદાગતઃ ॥ ૭-૮ ॥

પર્વોત્સવેષુ સર્વેષુ દદ્યાદ્ગન્ધપવિત્રકમ્ ।
શિવજ્ઞાનસ્ય ચારમ્ભે પ્રવાસગમનાગતૌ ॥ ૭-૯ ॥

શિવધર્મવ્રતારમ્ભે તત્સમાપ્તૌ ચ કલ્પયેત્ ।
પ્રસાદનાય કુપિતો વિજિત્ય ચ રિપું તથા ॥ ૭-૧૦ ॥

પુણ્યાહે ગ્રહશાન્તૌ ચ દીક્ષાયાં ચ સદક્ષિણમ્ ।

આચાર્ય પદસમ્પ્રાપ્તૌ પવિત્રે ચોપવિગ્રહે ॥ ૭-૧૧॥

ઉપાનચ્છત્રશયનં વસ્ત્રમાસનભૂષણમ્ ।
પાત્રદણ્ડાક્ષસૂત્રં વા ગુરુસક્તં ન ધારયેત્ ॥ ૭-૧૨॥

હાસ્યનિષ્ઠીવનાસ્ફોટમુચ્ચભાષ્યવિજૃમ્ભણમ્ ।
પાદપ્રસારણં ગતિં ન કુર્યાદ્ગુરુસંનિધૌ ॥ ૭-૧૩॥

હીનાન્નપાનવસ્ત્રઃ સ્યાન્નીચશય્યાસનો ગુરોઃ ।
ન યથેષ્ટશ્ચ સંતિષ્ઠેત્કલહં ચ વિવર્જયેત્ ॥ ૭-૧૪॥

પ્રતિવાતે ઽનુવાતે વા ન તિષ્ઠેદ્ગુરુણા સહ ।
અસંશ્રયે ચ સતતં ન કિંચિત્કીર્તયેદ્ગુરોઃ ॥ ૭-૧૫॥

અન્યાસક્તો ન ભુઞ્જાનો ન તિષ્ઠન્નપરાઙ્મુખઃ ।
ન શયનો ન ચાસીનઃ સંભાસ્યેદ્ગુરુણા સહ ॥ ૭-૧૬॥

દૃષ્ટ્વૈવ ગુરુમાયાન્તમુત્તિષ્ઠેદ્દૂરતસ્ત્વરમ્ ।
અનુજ્ઞાતશ્ચ ગુરુણા સંવિશેચ્ચાનુપૃષ્ઠતઃ ॥ ૭-૧૭॥

ન કણ્ઠં પ્રાવૃતં કુર્યાન્ન ચ તત્રાવસક્તિકામ્ ।
ન પાદધાવનસ્નાનં યત્ર પશ્યેદ્ગુરુઃ સ્થિતઃ ॥ ૭-૧૮॥

ન દન્તધાવનાભ્યઙ્ગમાયામોદ્વર્તનક્રિયાઃ ।
ઉત્સર્ગપરિધાનં ચ ગુરોઃ કુર્વીત પશ્યતઃ ॥ ૭-૧૯॥

ગુરુર્યદર્પયેત્કિંચિદ્ગૃહાસન્નં તદઞ્જલૌ ।
પાત્રે વા પુરતઃ શિષ્યસ્તદ્વક્ત્રમભિવીક્ષયન્ ॥ ૭-૨૦॥

યદર્પયેદ્ગુરુઃ કિંચિ તન્નમ્રઃ પુરતઃ સ્થિતઃ ।
પાણિદ્વયેન ગૃહ્ણીયત્સ્થાપયેત્તચ્ચ સુસ્થિતમ્ ॥ ૭-૨૧॥

ન ગુરોઃ કીર્તયેન્નામ પરોઽક્ષમપિ કેવલમ્ ।
સમાનસંજ્ઞમન્યં વા નાહ્વયીત તદાખ્યયા ॥ ૭-૨૨॥

સ્વગુરુસ્તદ્ગુરુશ્ચૈવ યદિ સ્યાતાં સમં ક્વચિત્ ।
ગુરોર્ગુરુસ્તયોઃ પૂજ્યઃ સ્વગુરુશ્ચ તદાજ્ઞયા ॥ ૭-૨૩॥

અનિવેદ્ય ન ભુઞ્જીત ભુક્ત્વા ચાસ્ય નિવેદયેત્ ।
નાવિજ્ઞાપ્ય ગુરું ગચ્છેદ્બહિઃ કાર્યેણ કેનચિત્ ॥ ૭-૨૪॥

ગુર્વાજ્ઞયા કર્મ કૃત્વા તત્સમાપ્તૌ નિવેદયેત્ ।
કૃત્વા ચ નૈત્યકં સર્વમધીયીતાજ્ઞયા ગુરોઃ ॥ ૭-૨૫ ॥

મૃદ્ભસ્મગોમયજલં પત્રપુષ્પેન્ધનં સમિત્ ।
પર્યાપ્તમષ્ટકં હ્યેતદ્ગુર્વર્થં તુ સમાહરેત્ ॥ ૭-૨૬ ॥

ભૈષજ્યાહારપાત્રાણિ વસ્ત્રશય્યાસનં ગુરોઃ ।
આનયેત્સર્વયત્નેન પ્રાર્થયિત્વા ધનેશ્વરાન્ ॥ ૭-૨૭ ॥

ગુરોર્ન ખણ્ડયેદાજ્ઞામપિ પ્રાણાન્પરિત્યજેત્ ।
કૃત્વાજ્ઞાં પ્રાપ્નુયાન્મુક્તિં લઙ્ઘયન્નરકં વ્રજેત્ ॥ ૭-૨૮ ॥

પર્યટેત્પૃથિવીં કૃત્સ્નાં સશૈલવનકાનનામ્ ।
ગુરુભૈષજ્યસિદ્ધ્યર્થમપિ ગચ્છેદ્રસાતલમ્ ॥ ૭-૨૯ ॥

યદાદિશેદ્ગુરુઃ કિંચિત્તત્કુર્યાદવિચારતઃ ।
અમીમાંસ્યા હિ ગુરવઃ સર્વકાર્યેષુ સર્વથા ॥ ૭-૩૦ ॥

નોત્થાપયેત્સુખાસીનં શયાનં ન પ્રબોધયેત્ ।
આસીનો ગુરુમાસીનમભિગચ્છેત્પ્રતિષ્ઠિતમ્ ॥ ૭-૩૧ ॥

પથિ પ્રયાન્તં યાન્તં ચ યત્નાદ્વિશ્રમયેદ્ગુરુમ્ ।
ક્ષિત્પિપાસાતુરં સ્નાતં જ્ઞાત્વા શક્તં ચ ભોજયેત્ ॥ ૭-૩૨ ॥

અભ્યઙ્ગોદ્વર્તનં સ્નાનં ભોજનષ્ઠીવમાર્જનમ્ ।
ગાત્રસંવાહનં રાત્રૌ પાદાભ્યઙ્ગં ચ યત્નતઃ ॥ ૭-૩૩ ॥

પ્રાતઃ પ્રસાધનં દત્ત્વા કાર્યં સંમાર્જનાઞ્જનમ્ ।
નાનાપુષ્પપ્રકરણં શ્રીમદ્વ્યાખ્યાનમણ્ડપે ॥ ૭-૩૪ ॥

સ્થાપ્યાસનં ગુરોઃ પૂજ્યં શિવજ્ઞાનસ્ય પુસ્તકમ્ ।
તત્ર તિષ્ઠેત્પ્રતીક્ષંસ્તદ્ગુરોરાગમનં ક્રમાત્ ॥ ૭-૩૫ ॥

ગુરોર્નિન્દાપવાદં ચ શ્રુત્વા કર્ણૌ પિધાપયેત્ ।
અન્યત્ર ચૈવ સર્પેત્તુ નિગૃહ્ણીયાદુપાયતઃ ॥ ૭-૩૬ ॥

ન ગુરોરપ્રિયં કુર્યાત્પીડિતસ્તાડિતો ऽપિ વા ।
નોચ્ચારયેચ્ચ તદ્વાક્યમુચ્ચાર્ય નરકં વ્રજેત્ ॥ ૭-૩૭ ॥

ગુરુરેવ પિતા માતા ગુરુરેવ પરઃ શિવઃ ।
યસ્યૈવ નિશ્ચિતો ભાવસ્તસ્ય મુક્તિર્ન દૂરતઃ ॥ ૭-૩૮ ॥

આહારાચારધર્માણાં યત્કુર્યાદ્ગુરુરીશ્વરઃ ।
તથૈવ ચાનુકુર્વીત નાનુયુઞ્જીત કારણમ્ ॥ ૭-૩૯॥

યજ્ઞાસ્તપાંસિ નિયમાત્તાનિ વૈ વિવિધાનિ ચ ।
ગુરુવાક્યે તુ સર્વાણિ સમ્પદ્યન્તે ન સંશયઃ ॥ ૭-૪૦॥

અજ્ઞાનપઙ્કનિર્મગ્નં યઃ સમુદ્ધરતે જનમ્ ।
શિવજ્ઞાનાત્મહસ્તેન કસ્તં ન પ્રતિપૂજયેત્ ॥ ૭-૪૧॥

ઇતિ યઃ પૂજયેન્નિત્યં ગુરુમૂર્તિસ્થમીશ્વરમ્ ।
સર્વપાપવિનિર્મુક્તઃ પ્રાપ્નોતિ પરમં પદમ્ ॥ ૭-૪૨॥

સ્નાત્વામ્ભસા ભસ્મના વા શુક્લવસ્ત્રોપવીતવાન્ ।
દૂર્વાગર્ભસ્થિતં પુષ્પં ગુરુઃ શિરસિ ધારયેત્ ॥ ૭-૪૩॥

રોચનાલભનં કુર્યાદ્ધૂપયેદાત્મનસ્તનુમ્ ।
અઙ્ગુલીયાક્ષસૂત્રં ચ કર્ણમાત્રે ચ ધારયેત્ ॥ ૭-૪૪॥

ગુરુરેવંવિધઃ શ્રીમાન્નિત્યં તિષ્ઠેત્સમાહિતઃ ।
યસ્માજ્જ્ઞાનોપદેશાર્થં ગુરુરાસ્તે સદાશિવઃ ॥ ૭-૪૫॥

ધારયેત્પાદુકે નિત્યં મૃદુવર્મપ્રકલ્પિતે ।
પ્રગૃહ્ય દણ્ડં છત્રં વા પર્યટેદાશ્રમાદ્બહિઃ ॥ ૭-૪૬॥

ન ભૂમૌ વિન્યસેત્પાદમન્તર્ધાનં વિના ગુરુઃ ।
કુશપાદકમાક્રમ્ય તર્પણાર્થં પ્રકલ્પયેત્ ॥ ૭-૪૭॥

પાદસ્થાનાનિ પત્રાદ્યૈઃ કૃત્વા દેવગૃહં વિશેત્ ।
પાત્રાસ્તરિતપાદશ્ચ(?) નિત્યં ભુઞ્જીત વાગ્યતઃ ॥ ૭-૪૮॥

ન પાદૌ ધાવયેત્કાંસ્યે લોહે વા પરિકલ્પિતે ।
શૌચયેત્તૃણગર્ભાયાં દ્વિતીયાયાં તથાચમેત્ ॥ ૭-૪૯॥

ન રક્તમુલ્બણં વસ્ત્રં ધારયેત્કુસુમાનિ ચ ।
ન બહિર્ગન્ધમાલ્યાનિ વાસાંસિ મલિનાનિ ચ ॥ ૭-૫૦॥

કેશાસ્થીનિ કપાલાનિ કાર્પાસાસ્થિતુષાણિ ચ ।
અમેધ્યાઙ્ગારભસ્માનિ નાધિતિષ્ઠેદ્રજાંસિ ચ ॥ ૭-૫૧॥

ન ચ લોષ્ટં વિમૃદ્નીયાન્ન ચ છિન્દ્યાન્નખૈસ્તૃણમ્ ।

ન પત્રપુષ્પમૂલ્યાનિ વંશમઙ્ગલકાષ્ઠિતામ્ ॥ ૭-૫૨॥

એવમાદીનિ ચાન્યાનિ પાણિભ્યાં ન ચ મર્દયેત્ ।
ન દન્તખાદનં કુર્યાદ્રોમાણ્યુત્પાટયેન્ન ચ ॥ ૭-૫૩॥

ન પદ્ભ્યામુલ્લિખેદ્ભૂમિં લોષ્ટકાષ્ઠૈઃ કરેણ વા ।
ન નખાંશ્ચ નખૈર્વિંધ્યાન્ન કણ્ડૂયેન્નખૈસ્તનુમ્ ॥ ૭-૫૪॥

મુહુર્મુહુઃ શિરઃ શ્મશ્રુ ન સ્પૃશેત્કરજૈર્બુધઃ ।
ન લિક્ષાકર્ષણં કુર્યાદાત્મનો વા પરસ્ય વા ॥ ૭-૫૫॥

સૌવર્ણ્યરૌપ્યતામ્રૈશ્ચ શૃઙ્ગદન્તશલાકયા ।
દેહકણ્ડૂયનં કાર્યં વંશકાષ્ઠીકવીરણૈઃ(?) ॥ ૭-૫૬॥

ન વિચિત્તં પ્રકુર્વીત દિશશ્ચૈવાવલોકયન્ ।
ન શોકાર્તશ્ચ સંતિષ્ઠેદ્ધૂત્વા પાણૌ કપોલકમ્ ॥ ૭-૫૭॥

ન પાણિપાદવાક્ચક્ષુઃ- શ્રોત્રશિશ્નગુદોદરૈઃ ।
ચાપલાનિ ન કુર્વીત સ સર્વાર્થમવાપ્નુયાત્ ॥ ૭-૫૮॥

ન કુર્યાત્કેનચિદ્વૈરમધ્રુવે જીવિતે સતિ ।
લોકકૌતૂહલં પાપં સંધ્યાં ચ પરિવર્જયેત્ ॥ ૭-૫૯॥

ન કુદ્વારેણ વેશ્માનિ નગરં ગ્રામમાવિશેત્ ।
ન દિવા પ્રાવૃતશિરા રાત્રૌ પ્રાવૃત્ય પર્યટેત્ ॥ ૭-૬૦॥

નાતિભ્રમણશીલઃ સ્યાન્ન વિશેચ્ચ ગૃહાદ્ગૃહમ્ ।
ન ચાજ્ઞાનમધીયીત શિવજ્ઞાનં સમભ્યસેત્ ॥ ૭-૬૧॥

શિવજ્ઞાનં પરં બ્રહ્મ તદારભ્ય ન સંત્યજેત્ ।
બ્રહ્માસાધ્ય ચ યો ગચ્છેદ્બ્રહ્મહા સ પ્રકીર્તિતઃ ॥ ૭-૬૨॥

કૃતાઞ્જલિઃ સ્થિતઃ શિષ્યો લઘુવસ્ત્રમુદઙ્મુખઃ ।
શિવમન્ત્રં સમુચ્ચાર્ય પ્રાઙ્મુખો ઽધ્યાપયેદ્ગુરુઃ ॥ ૭-૬૩॥

નાગદન્તાદિસંભૂતં ચતુરશ્રં સુશોભનમ્ ।
હેમરત્નચિતં વાપિ ગુરોરાસનમુત્તમમ્ ॥ ૭-૬૪॥

ન શુશ્રૂષાર્થકામાશ્ચ ન ચ ધર્મઃ પ્રદૃશ્યતે ।
ન ભક્તિર્ન યશઃ ક્રૌર્યં ન તમધ્યાપયેદ્ગુરુઃ ॥ ૭-૬૫॥

દેવાગ્નિગુરુગોષ્ઠીષુ વ્યાખ્યાધ્યયનસંસદિ ।
પ્રશ્ને વાદે ઽનૃતે ઽશૌચે દક્ષિણં બાહુમુદ્ધરેત્ ॥ ૭-૬૬॥

વશે સતતનમ્રઃ સ્યાત્સંહૃત્યાઙ્ગાનિ કૂર્મવત્ ।
તત્સંમુખં ચ નિર્ગચ્છેન્નમસ્કારપુરસ્સરઃ ॥ ૭-૬૭॥

દેવાગ્નિગુરુવિપ્રાણાં ન વ્રજેદન્તરેણ તુ ।
નાર્પયેન્ન ચ ગૃહ્ણીયાત્કિંચિદ્વસ્તુ તદન્તરા ॥ ૭-૬૮॥

ન મુખેન ધમેદગ્નિં નાધઃકુર્યાન્ન લઙ્ઘયેત્ ।
ન ક્ષિપેદશુચિં વહ્નૌ ન ચ પાદૌ પ્રતાપયેત્ ॥ ૭-૬૯॥

તૃણકાષ્ઠાદિગહને જન્તુભિશ્ચ સમાકુલે ।
સ્થાને ન દીપયેદગ્નિં દીપ્તં ચાપિ તતઃ ક્ષિપેત્ ॥ ૭-૭૦॥

અગ્નિં યુગપદાનીય ધારયેત પ્રયત્નતઃ ।
જ્વલન્તં ન પ્રદીપં ચ સ્વયં નિર્વાપયેદ્બુધઃ ॥ ૭-૭૧॥

શિવવ્રતધરં દૃષ્ટ્વા સમુત્થાય સદા દ્રુતમ્ ।
શિવો ઽયમિતિ સંકલ્પ્ય હર્ષિતઃ પ્રણમેત્તતઃ ॥ ૭-૭૨॥

ભોગાન્દદાતિ વિપુલાન્લિઙ્ગે સમ્પૂજિતઃ શિવઃ ।
અગ્નૌ ચ વિવિધાં સિદ્ધિં ગુરૌ મુક્તિં પ્રયચ્છતિ ॥ ૭-૭૩॥

મોક્ષાર્થં પૂજયેત્તસ્માદ્ગુરુમૂર્તિસ્થમીશ્વરમ્ ।
ગુરુભક્ત્યા લભેજ્જ્ઞાનં જ્ઞાનાન્મુક્તિમવાપ્નુયાત્ ॥ ૭-૭૪॥

સર્વપર્વસુ યત્નેન હ્યેષુ સમ્પૂજયેચ્છિવમ્ ।
કુર્યાદાયતને શોભાં ગુરુસ્થાનેષુ સર્વતઃ ॥ ૭-૭૫॥

નરદ્વયોચ્છ્રિતે પીઠે સર્વશોભાસમન્વિતે ।
સંસ્થાપ્ય મણિજં લિઙ્ગં સ્થાને કુર્યાજ્જગદ્ધિતમ્ ॥ ૭-૭૬॥

અન્નપાનવિશેષૈશ્ચ નૈવેદ્યમુપકલ્પયેત્ ।
ભોજયેદ્વ્રતિનશ્ચાત્ર સ્વગુરું ચ વિશેષતઃ ॥ ૭-૭૭॥

પૂજયેચ્ચ શિવજ્ઞાનં વાચયીત ચ પર્વસુ ।
દર્શયેચ્છિવભક્તેભ્યઃ સત્પૂજાં પરિકલ્પિતામ્ ॥ ૭-૭૮॥

પ્રિયં બ્રૂયાત્સદા તેભ્યઃ પ્રદેયં ચાપિ શક્તિતઃ ।
એવં કૃતે વિશેષેણ પ્રસીદતિ મહેશ્વરઃ ॥ ૭-૭૯॥

છિન્નં ભિન્નં મૃતં નષ્ટં વર્ધતે નાસ્તિ કેવલમ્ ।
ઇત્યાદ્યાન્ન વદેચ્છબ્દાન્સાક્ષાદ્બ્રૂયાત્તુ મઙ્ગલમ્ ॥ ૭-૮૦॥

અધેનું ધેનુમિત્યેવ બ્રૂયાદ્ભદ્રમભદ્રકમ્ ।
કપાલં ચ ભગાલં સ્યાત્પરમં મઙ્ગલં વદેત્ ॥ ૭-૮૧॥

ઐન્દ્રં ધનુર્મણિધનુર્દાહકાષ્ઠાદિ ચન્દનમ્ ।
સ્વર્યાતં ચ મૃતં બ્રૂયાચ્છિવીભૂતં ચ યોગિનમ્ ॥ ૭-૮૨॥

દ્વિધાભૂતં વદેચ્છિન્નં ભિન્નં ચ બહુધા સ્થિતમ્ ।
નષ્ટમન્વેષણીયં ચ રિક્તં પૂર્ણાભિવર્ધિતમ્ ॥ ૭-૮૩॥

નાસ્તીતિ શોભનં સર્વમાદ્યમઙ્ગાભિવર્ધનમ્ ।
સિદ્ધિમદ્બ્રૂહિ ગચ્છન્તં સુમં બ્રૂયાત્પ્રવર્ધિતમ્ ॥ ૭-૮૪॥

ન મ્લેચ્છમૂર્ખપતિતૈઃ ક્રૂરૈઃ સંતાપવેદિભિઃ ।
દુર્જનૈરવલિપ્તૈશ્ચ ક્ષુદ્રૈઃ સહ ન સંવદેત્ ॥ ૭-૮૫॥

નાધાર્મિકનૃપાક્રાન્તે ન દંશમશકાવૃતે ।
નાતિશીતજલાકીર્ણે દેશે રોગપ્રદે વસેત્ ॥ ૭-૮૬॥

નાસનં શયનં પાનં નમસ્કારાભિવાદનમ્ ।
સોપાનત્કઃ પ્રકુર્વીત શિવપુસ્તકવાચનમ્ ॥ ૭-૮૭॥

આચાર્યં દૈવતં તીર્થમુદ્ધૃતોદં મૃદં દધિ ।
વટમશ્વત્થકપિલાં દીક્ષિતોદધિસંગમમ્ ॥ ૭-૮૮॥

યાનિ ચૈષાં પ્રકારાણિ મઙ્ગલાનીહ કાનિચિત્ ।
શિવાયેતિ નમસ્કૃત્વા પ્રોક્તમેતત્પ્રદક્ષિણમ્ ॥ ૭-૮૯॥

ઉપાનચ્છત્રવસ્ત્રાણિ પવિત્રં કરકં સ્રજમ્ ।
આસનં શયનં પાનં ધૃતમન્યૈર્ન ધારયેત્ ॥ ૭-૯૦॥

પાલાશમાસનં શય્યાં પાદુકે દન્તધાવનમ્ ।
વર્જયેચ્ચાપિ નિર્યાસં રક્તં ન તુ સમુદ્ભવમ્ ॥ ૭-૯૧॥

સંધ્યામુપાસ્ય કુર્વીત નિત્યં દેહપ્રસાધનમ્ ।
સ્પૃશેદ્વન્દેચ્ચ કપિલાં પ્રદદ્યાચ્ચ ગવાં હિતમ્ ॥ ૭-૯૨॥

યઃ પ્રદદ્યાદ્ગવાં સમ્યક્ફલાનિ ચ વિશેષતઃ ।

ક્ષેત્રમુદ્રામયેચ્ચાપિ તસ્ય પુણ્યફલં શ‍ૃણુ ॥ ૭-૯૩॥

યાવત્તત્પત્રકુસુમ- કન્દમૂલફલાનિ ચ ।
તાવદ્વર્ષસહસ્રાણિ શિવલોકે મહીયતે ॥ ૭-૯૪॥

કૃશરોગાર્તવૃદ્ધાનાં ત્યક્તાનાં નિર્જને વને ।
ક્ષુત્પિપાસાતુરાણાં ચ ગવાં વિહ્વલચેતસામ્ ॥ ૭-૯૫॥

નીત્વા યસ્તૃણતોયાનિ વને યત્નાત્પ્રયચ્છતિ ।
કરોતિ ચ પરિત્રાણં તસ્ય પુણ્યફલં શ‍ૃણુ ॥ ૭-૯૬॥

કુલૈકવિંશકોપેતઃ પત્નીપુત્રાદિસંયુતઃ ।
મિત્રભૃત્યૈરુપેતશ્ચ શ્રીમચ્છિવપુરં વ્રજેત્ ॥ ૭-૯૭॥

તત્ર ભુક્ત્વા મહાભોગાન્વિમાનૈઃ સાર્વકામિકૈઃ ।
સ મહાપ્રલયં યાવત્તદન્તે મુક્તિમાપ્નુયાત્ ॥ ૭-૯૮॥

ગોબ્રાહ્મણપરિત્રાણં સકૃત્કૃત્વા પ્રયત્નતઃ ।
મુચ્યતે પઞ્ચભિર્ઘોરૈર્મહદ્ભિઃ પાતકૈર્દ્રુતમ્ ॥ ૭-૯૯॥

અહિંસા સત્યમસ્તેયં બ્રહ્મચર્યમકલ્કતા ।
અક્રોધો ગુરુશુશ્રૂષા શૌચં સંતોષમાર્જવમ્ ॥ ૭-૧૦૦॥

અહિંસાદ્યા યમાઃ પઞ્ચ યતીનાં પરિકીર્તિતાઃ ।
અક્રોધાદ્યાશ્ચ નિયમાઃ સિદ્ધિવૃદ્ધિકરાઃ સ્મૃતાઃ ॥ ૭-૧૦૧॥

દશલાક્ષણિકો ધર્મઃ શિવાચારઃ પ્રકીર્તિતઃ ।
યોગીન્દ્રાણાં વિશેષેણ શિવયોગપ્રસિદ્ધયે ॥ ૭-૧૦૨॥

ન વિન્દતિ નરો યોગં પુત્રદારાદિસંગતઃ ।
નિબદ્ધઃ સ્નેહપાશેન મોહસ્તમ્ભબલીયસા ॥ ૭-૧૦૩॥

મોહાત્કુટુમ્બસંસક્તસ્તૃષ્ણયા શ‍ૃઙ્ખલીકૃતઃ ।
બાલૈર્બદ્ધસ્તુ લોકો ઽયં મુસલેનાભિહન્યતે ॥ ૭-૧૦૪॥

ઇમે બાલાઃ કથં ત્યાજ્યા જીવિષ્યન્તિ મયા વિના ।
મોહાદ્ધિ ચિન્તયત્યેવં પરમાર્થો ન પશ્યતિ ॥ ૭-૧૦૫॥

સમ્પર્કાદુદરે ન્યસ્તઃ શુક્રબિન્દુરચેતનઃ ।
સ પિત્રા કેન યત્નેન ગર્ભસ્થઃ પરિપાલિતઃ ॥ ૭-૧૦૬॥

કર્કશાઃ કઠિના ભક્ષા જીર્યન્તે યત્ર ભક્ષિતાઃ ।
તસ્મિન્નેવોદરે શુક્રં કિં ન જીર્યતિ ભક્ષ્યવત્ ॥ ૭-૧૦૭ ॥

યેનૈતદ્યોજિતં ગર્ભે યેન ચૈવ વિવર્ધિતમ્ ।
તેનૈવ નિર્ગતં ભૂયઃ કર્મણા સ્વેન પાલ્યતે ॥ ૭-૧૦૮ ॥

ન કશ્ચિત્કસ્યચિત્પુત્રઃ પિતા માતા ન કસ્યચિત્ ।
યત્સ્વયં પ્રાક્તનં કર્મ પિતા માતેતિ તત્સ્મૃતમ્ ॥ ૭-૧૦૯ ॥

યેન યત્ર કૃતં કર્મ સ તત્રૈવ પ્રજાયતે ।
પિતરૌ ચાસ્ય દાસત્વં કુરુતસ્તત્પ્રચોદિતૌ ॥ ૭-૧૧૦ ॥

ન કશ્ચિત્કસ્યચિચ્છક્તઃ કર્તું દુઃખં સુખાનિ ચ ।
કરોતિ પ્રાક્તનં કર્મ મોહાલ્લોકસ્ય કેવલમ્ ॥ ૭-૧૧૧ ॥

કર્મદાયાદસંબન્ધાદુપકારઃ પરસ્પરમ્ ।
દૃશ્યતે નાપકારશ્ચ મોહેનાત્મનિ મન્યતે ॥ ૭-૧૧૨ ॥

ઈશ્વરાધિષ્ઠિતં કર્મ ફલતીહ શુભાશુભમ્ ।
ગ્રામસ્વામિપ્રસાદેન સુકૃતં કર્ષણં યથા ॥ ૭-૧૧૩ ॥

દ્વયં દેવત્વમોક્ષાય મમેતિ ન મમેતિ ચ ।
મમેતિ બધ્યતે જન્તુર્ન મમેતિ વિમુચ્યતે ॥ ૭-૧૧૪ ॥

દ્વ્યક્ષરં ચ ભવેન્મૃત્યુસ્ત્ર્યક્ષરં બ્રહ્મ શાશ્વતમ્ ।
મમેતિ દ્વ્યક્ષરં મૃત્યુસ્ત્ર્યક્ષરં ન મમેતિ ચ ॥ ૭-૧૧૫ ॥

તસ્માદાત્મન્યહંકારમુત્સૃજ્ય પ્રવિચારતઃ ।
વિધૂયાશેષસઙ્ગાંશ્ચ મોક્ષોપાયં વિચિન્તયેત્ ॥ ૭-૧૧૬ ॥

જ્ઞાનાદ્યોગપરિક્લેશં કુપ્રાવરણભોજનમ્ ।
કુચર્યાં કુનિવાસં ચ મોક્ષાર્થી ન વિચિન્તયેત્ ॥ ૭-૧૧૭ ॥

ન દુઃખેન વિના સૌખ્યં દૃશ્યતે સર્વદેહિનામ્ ।
દુઃખં તન્માત્રકં જ્ઞેયં સુખમાનન્ત્યમુત્તમમ્ ॥ ૭-૧૧૮ ॥

સેવાયાં પાશુપાલ્યે ચ વાનિજ્યે કૃષિકર્મણિ ।
તુલ્યે સતિ પરિક્લેશે વરં ક્લેશો વિમુક્તયે ॥ ૭-૧૧૯ ॥

સ્વર્ગાપવર્ગયોરેકં યઃ શીઘ્રં ન પ્રસાધયેત્ ।
યાતિ તેનૈવ દેહેન સ મૃતસ્તપ્યતે ચિરમ્ ॥ ૭-૧૨૦ ॥

યદવશ્યં પરાધીનૈસ્ત્યજનીયં શરીરકમ્ ।
કસ્માત્તેન વિમૂઢાત્મા ન સાધયતિ શાશ્વતમ્ ॥ ૭-૧૨૧॥

યૌવનસ્થા ગૃહસ્થાશ્ચ પ્રાસાદસ્થાશ્ચ યે નૃપાઃ ।
સર્વ એવ વિશીર્યન્તે શુષ્કસ્નિગ્ધાન્નભોજનાઃ ॥ ૭-૧૨૨॥

અનેકદોષદુષ્ટસ્ય દેહસ્યૈકો મહાન્ગુણઃ ।
યાં યામવસ્થામાપ્નોતિ તાં તામેવાનુવર્તતે ॥ ૭-૧૨૩॥

મન્દં પરિહરન્કર્મ સ્વદેહમનુપાલયેત્ ।
વર્ષાસુ જીર્ણકટવત્તિષ્ઠન્નપ્યવસીદતિ ॥ ૭-૧૨૪॥

ન તે ઽત્ર દેહિનઃ સન્તિ યે તિષ્ઠન્તિ સુનિશ્ચલાઃ ।
સર્વે કુર્વન્તિ કર્માણિ વિકૃશાઃ પૂર્વકર્મભિઃ ॥ ૭-૧૨૫॥

તુલ્યે સત્યપિ કર્તવ્યે વરં કર્મ કૃતં પરમ્ ।
યઃ કૃત્વા ન પુનઃ કુર્યાન્નાનાકર્મ શુભાશુભમ્ ॥ ૭-૧૨૬॥

તસ્માદન્તર્બહિશ્ચિન્તામનેકાકારસંસ્થિતામ્ ।
સંત્યજ્યાત્મહિતાર્થાય સ્વાધ્યાયધ્યાનમભ્યસેત્ ॥ ૭-૧૨૭॥

વિવિક્તે વિજને રમ્યે પુષ્પાશ્રમવિભૂષિતે ।
સ્થાનં કૃત્વા શિવસ્થાને ધ્યાયેચ્છાન્તં પરં શિવમ્ ॥ ૭-૧૨૮॥

યે ઽતિરમ્યાણ્યરણ્યાનિ સુજલાનિ શિવાનિ તુ ।
વિહાયાભિરતા ગ્રામે પ્રાયસ્તે દૈવમોહિતાઃ ॥ ૭-૧૨૯॥

વિવેકિનઃ પ્રશાન્તસ્ય યત્સુખં ધ્યાયતઃ શિવમ્ ।
ન તત્સુખં મહેન્દ્રસ્ય બ્રહ્મણઃ કેશવસ્ય વા ॥ ૭-૧૩૦॥

ઇતિ નામામૃતં દિવ્યં મહાકાલાદવાપ્તવાન્ ।
વિસ્તરેણાનુપૂર્વાચ્ચ ઋષ્યાત્રેયઃ(?) સુનિશ્ચિતમ્ ॥ ૭-૧૩૧॥

પ્રજ્ઞામથા વિનિર્મથ્ય(?) શિવજ્ઞાનમહોદધિમ્ ।
ઋષ્યાત્રેયઃ સમુદ્ધૃત્ય પ્રાહેદમણુમાત્રકમ્ ॥ ૭-૧૩૨॥

શિવધર્મે મહાશાસ્ત્રે શિવધર્મસ્ય ચોત્તરે ।
યદનુક્તં ભવેત્કિંચિત્તદત્ર પરિકીર્તિતમ્ ॥ ૭-૧૩૩॥

ત્રિદૈવત્યમિદં શાસ્ત્રં મુનીન્દ્રાત્રેયભાષિતમ્ ।

તિર્યઙ્મનુજદેવાનાં સર્વેષાં ચ વિમુક્તિદમ્ ॥ ૭-૧૩૪॥

નન્દિસ્કન્દમહાકાલાસ્ત્રયો દેવાઃ પ્રકીર્તિતાઃ ।
ચન્દ્રાત્રેયસ્તથાત્રિશ્ચ ઋષ્યાત્રેયો મુનિત્રયમ્ ॥ ૭-૧૩૫॥

એતૈર્મહાત્મભિઃ પ્રોક્તાઃ શિવધર્માઃ સમાસતઃ ।
સર્વલોકોપકારાર્થં નમસ્તેભ્યઃ સદા નમઃ ॥ ૭-૧૩૬॥

તેષાં શિષ્યપ્રશિષ્યૈશ્ચ શિવધર્મપ્રવક્તૃભિઃ ।
વ્યાપ્તં જ્ઞાનસરઃ શાર્વં વિકચૈરિવ પઙ્કજૈઃ ॥ ૭-૧૩૭॥

યે શ્રાવયન્તિ સતતં શિવધર્મં શિવાર્થિનામ્ ।
તે રુદ્રાસ્તે મુનીન્દ્રાશ્ચ તે નમસ્યાઃ સ્વભક્તિતઃ ॥ ૭-૧૩૮॥

યે સમુત્થાય શ‍ૃણ્વન્તિ શિવધર્મં દિને દિને ।
તે રુદ્રા રુદ્રલોકેશા ન તે પ્રકૃતિમાનુષાઃ ॥ ૭-૧૩૯॥

શિવોપનિષદં હ્યેતદધ્યાયૈઃ સપ્તભિઃ સ્મૃતમ્ ।
ઋષ્યાત્રેયસગોત્રેણ મુનિના હિતકામ્યયા ॥ ૭-૧૪૦॥

॥ ઇતિ શિવોપનિષદિ શિવાચારાધ્યાયઃ સપ્તમઃ ॥

॥ ઇતિ શિવોપનિષત્સમાપ્તા ॥

*Siva Upanishad*

pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*